A.C. Joshi Library
P.U. Chandigarh

MSS No. 409/5 Subject Ramayana

Name of MSS Valmiki Ramayana Sunderkand Tika

Author —

Period — Folios 420

Script Devnagiri Source Prithipal Singh, Jalandhar

Missing Folios

ॐ
श्री रा
वा सुं
टी
१

ॐ श्रीगणेशाय नमः ॐ संदेहेयस्यदासोब्धिंतित्वी दृष्टाचमैथिली दृष्टासीतेतिन्यभ्यवोचत्तेरामेतोमिविद्वं । ग्रंथसमुद्र
ह्रदेनमिच्छुमिस्मततश्चेतिततःशत्रुकर्षणोहनूमानरावणानीतायाः पदमन्विष्यनिश्यानंग्रन्वेष्टुंचारणोदेवजातिविशेषेणामच
रितेक्रियमानसंचारेपथिआकाशमार्गगमनायैयेष । निष्प्रतिद्वंद्वंसद्द्रायानरःद्विनप्रतिवर्धरहितंचग्रन्येउंष्करंकर्मलेचन

ॐ श्रीरामाय नमः ततोरावणनीतायाःसीतायाःशत्रुकर्षणः इयेषपदमन्वेष्टुंचा
रणाचरितेपथि १ दुष्करंनिष्प्रतिद्वंद्वंचिकीर्षन्कर्मवानरः समुदग्रशिरोग्रीवोगवां
पतिरिवाबभौ २ अथवैडूर्यवर्णेषुशाद्वलेषुमहाबलः धीरःसलिलकल्पेषुविच
चारयथासुखम् ३ द्विजान्वित्रासयन्धीमानुरसापादपान्हरन् मृगांश्चसुबहून्नि
घ्नन्प्रवृद्धइवकेसरी ४

एवंसीतान्वेषणंकर्मसमुदग्रमुन्नतंशिरोग्रीवाचयस्यसः अतएवगवांपतिर्वृषइवबभौ २ वैडूर्यवर्णशाद्वलप्रदेशास्यसम
इजलवत् श्यामत्वमस्तुत्वाभ्यामरमालवनस्तदृशक्रियाकालिकोरःपेषणेनप्रवृद्धःकेसरीवविचचार ३ ४ ॥
४ ॥

2

नीललोहितेनारक्तश्यामाभिः मांजिष्ठः रक्तसंयोग इति कतकः मांजिष्ठः पाटलवर्णत्वेन पद्मवर्णाः प्रसिद्धाः सितासितैः कल्माषैः शुक्लपाण्डरैरितिया
वत् स्वभावसिद्धैः शालस्वभावसिद्धैरुक्तरूपैर्धातुभिः समलंकृतं कामरूपित्वादिविशेषणाविद्धियं तादिभिरभीष्टानामाविष्टयतस्यविवि
वर्धस्यतलं तत्र नागवरैः समतायुते तिष्ठन्सकपिः ह्रदेनागरखवभौ ह्रदस्याम्यंशामलत्वेन ५ ६ ७ स्वयंभुवे पवनायपूथ्यतेमेनस्वज्ञानेन

नीललोहितमांजिष्ठपद्मवर्णैः सितासितैः स्वभावसिद्धैर्विमलैर्धातुभिः समलंकृतं ५ कामरू
पिभिराविष्टमभीक्ष्णं सपरिच्छदैः यक्षकिन्नरगंधर्वदेवकल्पैः सपन्नगैः ६ सतस्यगिरिवर्यस्य
तलेनागवरायुते तिष्ठन्कपिवरस्तत्र ह्रदेनाग इवाबभौ ७ सस्सूर्याय महेन्द्राय पवनाय स्वयंभुवे
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिं ८ अंजलिं प्राङ्मुखं कुर्वन्पवनायात्मयोनये ततोहि
ववृधे गंतुं दक्षिणो दक्षिणां दिशं प्लवगप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ववृधे रामवृद्ध्यर्थं समुद्र इ
वपर्वसु ९ निष्प्रमाणशरीरः सल्लिलंघयिषुरर्णवं बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतं ॥

योगिहृदः स भगवान्भगवान्प्रत्यक्षत्वभक्तोरामः पतेनसकलविघ्ननिवारणायेष्टदेवताप्रार्थनं सर्वेयात्रकृते कार्यमिति सदाचारो बोधितः ८ प्राङ्मु
खोनयेपवनाय स्वजनकाय वैरत्यर्थः दक्षिणः कुशलः ९ रामवृद्ध्यर्थं रामाभ्युदयाय १० निष्प्रमाणशरीरः परिच्छेदातिक्रांतदेहः पीड
यामास सल्लिलंघयिषुः संनादंवेशतः ११ ॥ ॥

श्री रा. सा. टी. २

3 एकेन पीडव्यापारेण मुहूर्तं पर्यन्तचलनं प्रशातयत् पर्वतः कर्ता चलनं कर्मेति ॥२ पुष्पमयो यथा पुष्पप्रचुर इव स्वयमिवेत्यर्थः ॥३ उत्तमवीर्येण
तेन पीड्यमानः स पर्वतः सलिलं प्रसुस्राव च ॥४ उक्तार्थस्यैव विवरणं पीड्यमान इति काञ्चनाञ्जनराजतीः स्वर्णदामादीनीति स्रोतःप्रकारान्निर्वर्तयामा।
सनदामत्वमुपाधिकृतं ॥५ किंच स शैलः समनःशिला विशालाः शिलाः समोच निपीडनात् प्रत एव मध्यमेन मध्यभागेनार्चिषा ज्वालया जुष्टो।

स चचालाचलश्चाशु मुहूर्तं कपिपीडितः तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥२ तेन पादपमु
क्तेन पुष्पौघेण सुगन्धिना सर्वतः संवृतः शैलो बभौ पुष्पमयो यथा ॥३ तेन चोत्तमवीर्येण पीड्यमानः
स पर्वतः सलिलं संप्रसुस्राव मदं मत्त इव द्विपः पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः रीतीर्निर्वर्त
यामास काञ्चनाञ्जनराजतीः ॥५ मुमोच च शिलाः शैलो विशालाः समनःशिला मध्यमेनार्चिषा जु
ष्टो धूमराजिरिवानलः हरिणा पीड्यमानेन पीड्यमानानि सर्वतः गुहाविष्टानि सत्त्वानि विनेदुर्वि
कृतैः स्वरैः ॥७ स महासत्त्वसंनादः शैलपीडानिमित्तजः पृथिवीं पूरयामास दिशश्चोपवनानि च ॥८

धूमराजीरिवानलस्तस्य धूमराजिरिव बभावित्यर्थः यत्तु सेतौ व्याहारः धूमराजिरिवेति ह्रस्वपाठः तीर्थस्तु मध्यमेनार्चिषा स्वयमाप्त्या याऽग्निर्जिह्वा
यां नष्टो विशिष्टः सः धूमराजी इव धूमनिवृत्यनिवेत्यर्थः धूमराजी इति चपाच रत्नाद ॥६ हरिणा कनृमता पीड्यमानेन पर्वतेन
पीड्यमानानि सत्त्वानि ॥७ स महासत्त्वेति पादे महा सत्त्वा महान्त्वस्तेषां सन्नाद उग्रध्वनिरिति तीर्थः समहासत्त्वसन्नाद इति पाठान्तरं ॥८२

४ स्वस्तिकः फणास्य नीलरेखाविद्धैः शिरोभिरुपलक्षिताः दर्दशुः पीडा जनितक्रोधवशात् १९ सविशेषैस्तैः सर्वैः दृष्टाः समन्ताद्यावत्कीदृशा इव तज्जलैः विभिन्नभिन्नावभवन् २० शमितं शयितं २१ भग्नैः प्रस्खलद्भिः प्रभृतिमहाभूतैः २२ छित्त्वेत्यत्र विद्याधराः कर्त्तारः २३ प्रार्थभाणि च ऋषभव
म

शिरोभिः हृष्यु भिन्नाग्रा व्यक्तिस्वस्तिकलक्षणैः वमन्तः पावकं चोर्ध्वं ददंशुर्दशनैः शिलाः १९
तास्तदा सविशेषैर्दृष्टाः कुपितैस्तैर्महाशिलाः जज्वलुः पावकोद्दीप्ता विभिन्नाश्च सहस्रधा २० यानि तोयेष्वथ
जालानि तस्मिन्जातानि वर्त्तने विषघ्नान्यपि नागानां न शेकुः शमितुं विषं २१ भिद्यमानेषु गिरिशृङ्गेषु विति
मानानपस्विनः प्रस्तावि विद्याधरास्तस्मात्तेनैव स्रीगणैः सह २२ यानभूमिं गतं छित्त्वा हेममासनभाज
नं पत्राणि च महार्हाणि करकांश्च हिरण्मयान् २३ मेहानेकांश्च वचानुभक्ष्यान् भोज्यानि विविधानि च
प्रार्थभाणि च वर्माणि स्वर्णाम्बुकनकं तथा तूर्णं २४ कृतकण्ठगुणाः स्रीवा रक्तमाल्यानुलेपना रक्ताक्षा
रक्तरागात्तागमनं प्रतिपेदिरे २५ हारनूपुरकेयूरपारिहार्यधराः स्रियः विस्मिताः सस्मितास्तस्थु
राकाशे रमणैः सह २६

मणीर्षि भिन्नानि वर्माणि फलकानि त्सरुः खड्गमुष्टिः २४ कृताकण्ठेषु गुणाः सज्जीयेस्ते स्रीवामन्त्राः प्रकारंपन्नं २५ परिहारशब्दः श्रेष्ठवाचीति कतकः

श्री
वा. रा.
टी. सुं.
३

5 एतद्द्वे श्लोकद्वयंप्रक्षिप्तंकैश्चित्कृतकः तेषांतपस्विनांआकाशचारितपस्विनांवाचः पृष्ठपर्वतसंकाशइत्यादिश्लोकद्वयरूपाः

दृश्यतेयंतेमहाविद्याविद्याधरमहर्षयः सहितास्तस्थुराकाशेवीर्यंदृष्टैवचपर्वते २६ शुश्रुवुश्चतदा
शब्दमृषीणांभावितात्मनां चारणानांचसिद्धानांस्थितानांविमलाम्बरे पृष्ठपर्वतसंकाशोहनूमान्
मारुतात्मजः तितीर्षतिमहावेगःसमुद्रंवरुणालयं २७ रामार्थंवानरार्थंचचिकीर्षन्कर्मदुष्करं
समुद्रस्यपरंपारंदुष्प्रापंप्राप्तुमिच्छति २८ इतिविद्याधरावाचःश्रुत्वातेषांतपस्विनां तमप्रमेयंददृ
शुः पर्वतेवानरर्षभं २९ दुधुवेचसरोमाणिचकंपेचाचलोपमः ननादचमहानादंसुमहानिवतोय
दः ३० आनुपूर्व्याचवृत्तंतल्लांगूलंलोमभिश्चितं उत्पतिष्यन्विचिक्षेपपक्षिराजइवोरगं ३१
तस्यलांगूलमाविद्धमतिवेगस्यपृष्ठतः ददृशेगरुडेनेवह्रियमाणो महोरगः ३२

श्रुत्वाविद्याधरास्तमप्रमेयंददृशुः तदाकृष्णावणात्पूर्वंतमृतैरयंगिरिर्भिद्यतइतिज्ञातवंत २७ २८ २९ दुधुवेचसहनूमान् ३१
आनुपूर्व्याहृतविवलयंलांगूलंविचिक्षेपेत्यन्वयः ३० आविद्धंआस्फालितमग्रेच ३२

6 बाहू संस्तंभयामासेति अप्लवनेसंनादाभिनयः बाह्वोः संस्तंभनंनामपर्वतो परि दृढप्रतिष्ठापनं कपिः कंट्यांकटिप्रदेशे ससादकायप्रसारणात्
कृशोभूत् ऊरुःशिरसोरूर्ध्वप्रसारणेसहैवचरणभागस्याधःसंकोचनेनयात्वकटिदेशस्येतिबोध्यं २३ भुजौसंहृत्यांसप्रदेशेसंकुच्यशिरोधरां
ग्रीवांकंठदेशेसंकुच्यतेजःपराभिभवसामर्थ्यंसत्वंबलंशारीरंवीर्यमांतरंबलं २४ दूरान्मार्गमालोकयन् अनन्तरपवोर्ध्वप्रणिहितेक्षणः दृ

बाहू संस्तंभयामास महापरिघसन्निभौ ससाद कपिः कट्यां चरणौ संचुकोच च २३ संहृत्य च
भुजौ श्रीमान् तथैव च शिरोधरां तेजः सत्वं तथा वीर्यमाविवेश स वीर्यवान् मार्गमालोकयन्दूराद्
ऊर्ध्वप्रणिहितेक्षणः रुरोध हृदये प्राणानाकाशमवलोकयन् २५ पद्भ्यां दृढमवस्थानं कृत्वा स
कपिकुंजरः निकुच्य कर्णौ हनुमानुत्पतिष्यन्महाबलः वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् सं
यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः २६ गच्छेत्तद्वद्गमिष्यामि लंकां रावणपालितां नहि द्रक्ष्या
मि यदि तां लंकायां जनकात्मजां अनेनैव हि वेगेन गमिष्यामि सुरालयं यदि वा त्रिदिवे सीतां न द्र
क्ष्यामि कृतश्रमः २७ बध्वा राक्षसराजानमानयिष्यामि रावणं सर्वथा कृतकार्योहमेष्यामि सह

दयेप्राणप्रतिष्ठाप्याते २५ कर्णौ निकुच्यसंकुच्य उत्पतनसनादवशाद्धिकर्णसंकोचोभवति २६ श्वसनस्यवायोरिवविक्रमोवेगोयस्यसः २७ तद्व
द्गमिष्यामि अनेनतद्वदेवगत्वाकृतकार्यआगमिष्यामितिसूचितं तस्यैवप्रपंचोनहीत्यादि अनेनैवपर्वविधेनैव २९ आनयिष्यामिआनेष्यामि

श्री बा
रा टी
मू
४

समन्ताद्धेति शैषपर्वतोत्पाटनवदितिभावः ४१ अविचारयन् लंघनक्लेशलेशमगणयन्नतसैवप्रपंचनं सुपर्णमित्यादि ४२ वेगाद्वेगवन्
मतिसमुत्पततितेनगरोहिणः पर्वतस्थवृक्षाः सर्वान्विटपान्सर्वाःशाखाःसंहृत्यसंक्षिप्यवेगात्समुत्पेतुः ४३ मत्ताःकोयष्टिमायेष्वतान्

आनयिष्यामिवालंकांसमुत्पाट्यसरावणां एवमुक्त्वातुहनूमान्वानरोवानरोत्तमः ४१ उत्पपाताथ
वेगेनवेगवानविचारयन् सुपर्णमिवचात्मानंमेनेसकपिकुंजरः ४२ समुत्पततिवेगात्तुवेगात्ते
नगरोहिणः संहृत्यविटपान्सर्वान्समुत्पेतुःसमंततः ४३ समत्तकोयष्टिकामान्पादपान्पुष्पशा
लिनः उद्वहन्नूरुवेगेनजगामविमलेंबरे ऊरुवेगोत्थितावृक्षामुहूर्तंकपिमन्वयुः प्रस्थितंदी
र्घमध्वानंस्वबंधुमिवबांधवाः तमूरुवेगोन्मथिताःसालाश्चान्येनगोत्तमाः अनुजग्मुर्हनूमंतं
सैन्याइवमहीपतिं सपुष्पिताग्रैर्बहुभिःपादपैरन्वितःकपिः हनुमान्पर्वताकारोबभूवाद्भुतद
र्शनः सारवंतोथयेवृक्षान्यमज्जंल्लवणांभसि भयादिवमहेंद्रस्यपर्वतावरुणालये ४८

कोयष्टिकोयष्टिमोयर्य्यायो ४४ सालाःसर्ववृक्षाःसैन्यशब्दोर्थंत्वादि ४६ पर्वताकारःतत्तद्वृक्षदलेनपुष्पितवृक्षत्वदलेनच ४७ सारवंतोगुरु
त्वातिशययुक्ताः खदिरसदृशास्तगुरुत्वाल्लवणांभसिन्यमज्जन् यद्यपिदन्येचलन्त्ववःसहैवगत्वाउत्तिवोध्यंमहेंद्रस्यभयात्पर्वताके

४ नानाकुसुमैः सानुयायिद्रुमीयैः साङ्कुरकोरकैः कानिचित्समातिग्रंकुरिता निचित्कोरकैर्कुड्मलानि विकसितानीत्यर्थः ४९ तस्य हनूमतो वेगेन वि
मुक्तास्तेन विमुक्ताः स्लिष्टत्वाः सलिलेऽव्यवशीर्यन्त ग्राप्रोषांद्रभावः सुहृदो यथा बंधुप्रस्थापनार्थं गताः सुहृदो यथा तान्प्रस्थाप्य निवृत्ताः पीस्मैतेन हत ५०

स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ४९ विमुक्ता
स्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ५० लघुत्वेनोपपन्नं तद्वि
चित्रं सागरेऽपतत् द्रुमाणां विविधं पुष्पं कपिवायुसमीरितं ५१ पुष्पौघेणानुबंधेन नानावर्णेन वा
नरः बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषितः ५२ तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत ताराभिरि
व माभिरुदिताभिरिवांबरं तस्यांबरगतौ बाहू ददृशाते प्रसारितौ पर्वताग्राद्विनिष्क्रान्तौ पंचास्याविव
पन्नगौ ५४ पिबन्निव बभौ चापि सोर्मिजालं महार्णवं पिपासुरिव चाकाशं ददृशे स महाकपिः ५५

पुष्पं अपतदिति छेदः पतत्पतत्रलघुत्वेनोपपन्नस्वपपन्निमत् ५१ सवर्णानां विद्युत्सत्त्वात् नानावर्णपुष्पौघानुबद्धस्य स विद्युद्गणमेघोपमा ५२ रामाभिः
रमणीयाभिः ५३ ५४ विवृतवक्त्रत्वात् पिबन्निवेति ग्रीवे वक्त्रे ऊर्ध्ववक्त्रत्वे आकाशं पिपासुरिवेति ५५

श्री
रा वा
हं टी
५

१ विशकाशेतेविशेषेण प्रकाशेतेस्मयुगनलौदावानलौ ५६ पिंगेपिंगलवर्णेपरिमंडलेपरितोवहुप्रभामंडलेस्थितौचंद्रसूर्यौविवपक
गिरेरुदयेपिंगमंडलतयावस्थितौचंद्रसूर्याविवेत्यर्थः ५७ नासिकयाप्रक्रमितिशेषः संध्याकालिकंसूर्यमंडलंयथातथाबभावि

तस्यविद्युत्प्रभाकारेवायुमार्गानुसारिणः नयनेविप्रकाशेतेपर्वतस्यविवानलौ ५६ पिंगेपिं
गाक्षमस्यस्यबृहतीपरिमंडले चक्षुषीसंप्रकाशेतेचंद्रसूर्याविवस्थितौ ५७ साचनासिकयातस्य
ताम्रयाताम्रमावभौ संध्ययासमभिस्पृष्टंयथास्यात्सूर्यमंडलं ५८ लांगूलंचसमाविद्धंप्लमानस्य
शोभते अंबरेवायुपुत्रस्यशक्रध्वजइवोच्छ्रितं ५९ लांगूलचक्रोद्दहनमातप्रशुक्लदंष्ट्रोनिलात्मजः
व्यरोचनमहाप्राज्ञःपरिवेषीवभास्करः ६० स्फिग्देशेनाभिताम्रेणरराजसमहाकपिः महतादारिते
नेवगिरिर्गैरिकधातुना ६१ तस्यवानरसिंहस्यप्लवमानस्यसागरं कक्षान्तरगतोवायुर्जीमूतइवगर्जति

नार्थः ५८ ५९ शुक्लदंष्ट्रत्वंस्वरूपकथनमात्रंनतुपरिवेषिभास्करोपमोपयोगि ६० स्फिक्कटिदेशेनकटिप्रदेशेनतत्काऽस्यातिताम्रत्ववर्णि
नादस्याशस्यातह णोत्वग्रतएवदारितेगैरिकधातुप्रक्रोगिर्युपमा ६१ जीमूतेश्वतिसप्रंप्यतामितिकतकः गर्जतिजगर्ज ६२ ५

10 अम्बरांतात् अम्बरोर्ध्वदिग्भागात् सानुबंधा सहोल्कांतरानुवद्धा इदं विशेषणं ग्रहसादिन्यात् ९३ पतत्पतंगसंकाशः गच्छत्सूर्यसंकाशः
व्यायतो दीर्घः कपिः कक्षया कक्षावस्त्रेण वध्यमानया गजमध्यवर्धनरज्ज्वा युक्तः प्रवृद्धो मातंग इव वभौ कक्षा प्रकोष्ठे हर्म्यादेः कांच्यां मध्ये
भवंधने इति ९४ उपरिष्टात् वेगच्छतात् शरीरेणाधः सागरे वगाढया स्वस्य छायाप्रतिविवेन लक्षितैः समागरे मारुताविष्टा नौरिवासीत्

वियत्यत्निपतत्युल्का अम्बरांताद्विनिःसृता दृश्यते सानुबंधा च तथा स कपिकुंजरः ९३ पतत्पतंगसं
काशो व्यायतः शुशुभे कपिः प्रवृद्ध इव मातंगः कक्षया बध्यमानया ९४ उपरिष्टाच्छरीरेणच्छायया
चावगाढया सागरे मारुताविष्टा नौरिवासीत्तदा कपिः यं यं देशं समुद्रस्य जगाम स महाकपिः
स तत्तस्यांगवेगेन सोन्माद इव लक्ष्यते ९५ सागरस्योर्मिजालानामुरसा शैलवर्ष्मणा अभिघ्नं
स्तु महावेगः पुप्लुवे स महाकपिः ९६

नौश्चोपरि विद्यमानपदार्थेन सह सागरे वायुवशाद्वेगेन चंचला गच्छतीति तदुपमा ९५ सोन्माद इव सायस्मार इव घूर्णनफेनवमनवि
क्रोशनादिविकारसाम्यात् ९६ ऊर्मिजालानामभिघ्नन् कर्मणः शेषत्वविवक्षया षष्ठी नान्यभिघ्नन्निति यावत् शैलसदृशेन ग्रनेन साग

सुंदरकांडटीकायां ८

श्री
वा. रा.
सुं. टी.
८

॥ कपिवातःकपितोत्थापितःवातःमेघवातःमेघमंडलवातः ६८ नेदसीद्यावापृथिव्यौविकिरन्निवस्थकृतिपन्निव ६९ अतीत्यातीत्यगमा
नाद्गिगणयन्निवेत्युत्प्रेक्षा ७० तस्यवेगसमुद्धूतमुद्धिप्रंउत्पवसजलदंजलदसहितंअंबरेमेघमंडलपर्यंतमूर्ध्वगतंप्रवरस्थंजलमाततंतीव

कपिवातश्चबलवान्मेघवातश्चनिःसृतः सागरंभीमनिर्ह्रादंकंपयामासतुर्भृशं ६८ विकर्षन्नू
र्मिजालानिबृहंतिलवणांभसि पुप्लुवेकपिशार्दूलोविकिरन्निवरोदसी ६९ मेरुमंदरसंकाशा
नुद्गतान्समहार्णवे अत्यक्रामन्महावेगस्तरंगान्गणयन्निव ७० तस्यवेगसमुद्धूतंजलंसजलदं
तदा अंबरस्थंविबभ्राजशारदाभ्रमिवाततं ७१ तिमिनक्रझषाःकूर्मादृश्यंतेविवृतास्तदा वस्त्रापक
र्षणेनेवशरीराणिशरीरिणां ७२ क्रममाणंसमीक्ष्याथभुजंगाःसागरंगमाः व्योम्नितंकपिशा
र्दूलंसुपर्णमिवमेनिरे ७३

ततंशारदाभ्रमिवरोचमानेमेघसंयवैभेम्यच्छत्वादितिभावः विवृताःवेगाज्जलोत्सारणेनव्यक्तदेहाःवस्त्रापहारेणशरीराणिप्रवया

रा
९
श्री
८

12 छायाप्रमाणावर्णनेन तच्छरीरप्रमाणमपि वर्णितप्रायं इयं माध्यान्हिकी छाया ७४ श्वेताभ्रघनराजीव श्वेताभ्रयुक्तमेघपंक्तिवत्तस्य छा-
या शुशुभे शुक्लत्वं हासादिना तावर्णत्वात् क्रोधमानिर्वादः ७५ ७६ द्रोणी द्रव्योदिनलिनिर्गमकाष्टयंत्रं तज्जलधारायुक्तश्चवक्रतो द्रोणीकृतः

दशयोजनविस्तीर्णा त्रिंशद्योजनमायता छायावानरसिंहस्य जवे चारुतराभवत् ७४ छाया

श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी तस्य सा शुशुभे छाया पतिता लवणाम्भसि ७५

शुशुभे स महातेजा महाकायो महाकपि वायुमार्गे निरालंबे पक्षवानिव पर्वतः ७६

येनासौ याति बलवान्वेगेन कपिकुंजरः तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ७७

आपाते पक्षिसंघानां पक्षिराज इव व्रजन् हनूमान्मेघजालानि प्रकर्षन्मारुतो यथा ७८

मेघभूतदाबृते नेते अंभोजलसवर्णादिति भावः ७७ आपतंत्यस्मिन्नित्यापातो मार्गः पांडुरत्वादिगुणकानि मेघजालानि प्रकर्षन्मारुतो यथाभ्र-

सुंदकां ५१

श्री
वा रा
सु टी
८

13 कपिनाकृष्यमाणानिमहाभ्राणिचकाशिरे मारुतेनाकृष्यमाणानीवेतिशेषः ७९ ततउत्प्लवतो ८० तन्नदितंतापेत्यन्वयः वायुःसि

पाण्डरारुणवर्णानिनीलमांजिष्ठकानिव कपिनाकृष्यमाणानिमहाभ्राणिचकाशिरे ७९
प्रविशन्नभ्रजालानिनिष्पतंश्चपुनःपुनः प्रच्छन्नश्चप्रकाशश्चचंद्रमाइवलक्ष्यते ८० प्लवमा
नंतुतंदृष्ट्वाप्लवंगंत्वरितंतदा ववृषुःपुष्पवर्षाणिदेवगंधर्वदानवाः ८१ तताप नहितंसूर्यः
प्लवंतंवानरेश्वरं सिषेवेचतदावायूरामकार्यार्थसिद्धये ८२ ऋषयस्तुष्टुवुश्चैनंप्लवमानंवि
हायसा जगुश्चदेवगंधर्वाःप्रशंसंतोवनौकसं ८३ नागाश्चतुष्टुवुर्यक्षारक्षांसिविविधानि
च प्रेक्ष्यसर्वेकपिवरंसहसाविगतक्लमं ८४ तस्मिन्प्लवगशार्दूलेप्लवमानेहनूम
ति इक्ष्वाकुकुलमानार्थीचिंतयामाससागरः ८५

षेवेश्रमापनयनायेतिभावः ८२ कपिवरंविगतक्लमंवी
क्ष्यनागायक्षाश्चतुष्टुवुः ८४ इक्ष्वाकुकुलस्यस्वोत्पादकस्यमानंसत्कारमर्थयतेतथाभूतः ८५

14 विवस्वतांवाग्मीक्ष्वाकुवंश्यानांसर्ववाच्यः सर्ववाच्यंनिंदायस्मिन्तादृशोभविष्यामि सर्वनिंदास्पदंभविष्यामीत्यर्थः ८८ उक्तमेवविवृणोति
अहमिति तस्मात्एषश्रवसादितुंश्रवसन्नश्रमंगंतुंनार्हति सागरेणविदितइक्ष्वाकुकश्चिद्देशः सागरत्वात्स्यात्एवतस्यवहइतिज्ञापयेत् ८० शेषं
मार्गशेषं ८८ श्रमंसिस्वांभसिछन्नंहिरण्यप्रधानंतन्मयमितियावत्नाभिःप्रधानेकस्तूर्यामिति ८९ परिघइति पक्षच्छेदभयात्समुद्रप्रवे

साहाय्यंवानरेंद्रस्ययदिनाहंहनूमतः करिष्यामिभविष्यामिसर्ववाच्योविवस्वतां अहमिक्ष्वाकुना
येनसागरेणविवर्धितः इक्ष्वाकुसचिवश्चायंतन्नार्हत्यवसादितुं ८० तथामयाविधातव्यंविश्रमेतत
यथाकपिः शेषंचमयिविश्रांतःसुखीसोतितरिष्यति ८८ इतिकृत्वामतिंसाध्वींसमुद्रश्छन्नमंभसि
हिरण्यनाभंमैनाकमुवाचगिरिसत्तमं ८९ त्वमिहासुरसंघानांदेवराज्ञामहात्मना पातालनिल
यानांहिपरिघःसन्निवेशितः ९० त्वमेषांज्ञातवीर्याणांपुनरेवोत्पतिष्यतां पातालस्याप्रमेयस्यद्वार
मावृत्यतिष्ठसि ९१ तिर्यगूर्ध्वमधश्चैवशक्तिस्तेशैलवर्धितुं तस्मात्संचोदयामित्वामुत्तिष्ठगिरिस
मम ९२

शानंतरंपातालस्यरानसनिरोधार्थंद्वारतिरोधकपरिघवन्मैनाकःस्थापितइत्यर्थः ९० ज्ञातवीर्याणांदेवराजे
नेतिशेषः एषांअसुराणांशक्तिस्तेअस्तीतिशेषः तस्मात्पिहितापातालमस्यपवचसन्नूर्ध्वदिशञ्चावर्धमानःसन्नूर्ध्वमुत्तिष्ठ ९२
॥ ॥ ९२।९२ ॥

श्री
रा वा
सु टी
८

15 उपर्यैतितवोपरिप्रदेशंप्राप्नोतितस्माद्विश्रामायत्वमत्रिष्ठेतिपूर्वेणान्वयः पतङ्गसंहनूमान्रामकार्यार्थीभीमकर्माखमाप्लुतः श्रमं
वस्लवगेंद्रस्यसमीद्योस्यातमहंसीतिशेषवीनःपाक्रपाठः अत्रस्वमाप्लुतइत्यनंतरकेचितश्लोकाःप्रदिप्ताःपतोरामकार्यार्थीयतश्च

सएषकपिशार्दूलस्त्वामुपयेतिवीर्यवान् हनूमान्नामकार्यार्थीभीमकर्मास्वमाप्लुतः श्रमं
वल्लवगेंद्रस्यसमाद्योप्यामसद्देसि ९३ हिरण्यनाभोमैनाकोनिशम्यलवणाभसः उत्पपा
तजलात्तूर्णमहाद्रुमलताहतः ससागरजलंभित्वाबभूवात्युच्छ्रितस्तदा यथाजलधरंभित्वादी
प्तरश्मिर्दिवाकरः ९५ समहात्मामहूर्तेनपर्वतःसलिलाहृतः दर्शयामासशृंगाणिसागरेण
नियोजितः शातकुंभमयैःशृंगैःसकिन्नरमहोरगैः आदित्योदयसंकाशैरालिखद्भिरिवां
वरम् ९७ तस्यजांबूनदैःशृंगैःपर्वतस्यसमुत्थितैः आकाशंशस्त्रसंकाशमभवात्कांचनप्र
भं ९८ जातरूपमयैःशृंगैर्भ्राजमानैर्महाप्रभैः आदित्यशतसंकाशःसोभवद्गिरिसत्तमः ९९
तमुत्थितमसंगेनहनूमानग्रतःस्थितं मध्येलवणतोयस्यविघ्नोयमितिनिश्चितः १००

आस्पतितनतस्तस्यश्रमंसीदोस्यात्मसद्देसि ९३ लवणांभसोवचोनिशम्येत्यर्थः ९४ पतङ्गतरंशातकुंभमयेरित्यादिग्रन्थापिक्षिप्त
श्लोकपक्षेपःपेशवादिरणनाभविवरणंशातकुंभमयैरिति आदित्योदयसंकाशैरितिउपलक्षितश्वेतिशेषः ९७ शस्त्रसंकाशंशस्त्रव

[illegible]

16 पातयामास तमनर्थमच्छिनं दृष्टान्तच्छुरं पातयामासेत्यर्थः ७ सादितोवसादितोऽधःकृत इति यावत् जदर्षवननादृचेति प्राचीनः पाठः नत्वैवे
भवं दृष्टान्तदृष्टे सोम्यानभ्रो जनावेदनार्थनादः शब्दं कृतवान्नेनेदेति त्वाधुनिककल्पितः पाठः २ तदेव विहृणोति तमिति ३ ४ राघव

सतमच्छ्रितमत्यर्थं महावेगो महाकपिः उरसा पातयामास जीमूतमिव मारुतः १ स तदा सादितस्तेन कपिना पर्वतोत्तमः बुध्वा तस्य हरेर्वेगं जहर्ष च ननाद च २ तमाकाशगतं वीरमाकाशे समवस्थितः प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिः ३ मानुषं धारयन्रूपमात्मनः शिखरे स्थितः दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ४ निपत्य मम शृङ्गेषु विश्रम्य गम्यतां राघवस्य कुले जातैरुदधिः परिवर्धितः ५ स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः कृते च प्रतिकर्तव्यमेष धर्मः सनातनः ६ सोऽयं तत्प्रतिकारार्थी त्वत्तः सम्मानमर्हति त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ७

स्य कुले जातैः सगरप्रभृतैः ५ कृतमुपकारः ६ योयं राघवकुलजः तत्प्रतिकारार्थी तत्कुलप्रत्युपकारार्थीः तत्वः सत्क्रियमाणात्
त्वद्वारभूतात्संमानं राघवे कुलपूजामर्हतीति त्वन्निमित्तं त्वत्कारार्थे प्रचोदितः प्रेरितः ७

श्री वा रा सुं टी ९ 17 शेषणाप्रकारो योजनानामिति योजनानांशतमपि प्रक्रमितं समाल्लुत एव कपिः शेषं प्रक्रान्तावशेषं तवसानुश्चविश्रान्तः सन्प्रक्रमता
मिति यतः शेरतेतोस्मिन्नतोमपि तिष्ठ इत्यत्वाविक्रम्य पश्चाद्गम्यतामिति योजना अतिष्ठत्वमित्यर्थं प्रविश्रममिति केचित् ॥८ तन्नस्मात्

तिष्ठत्वं दृष्टिशालेत्वमपि विश्रम्यगम्यतां योजनानांशतंचापिकपिरेषवमाल्लतः तवसान
श्चविश्रान्तः शेषप्रक्रमतामिति तदिदं राघवस्माद्कंदमूलफलंवद्र ॥८ तदास्वाद्यहृदि श्रेष्ठ
विश्रान्तो यदा सिध्यसि अस्माकमपि संबंधः कोपि समाख्यायास्तिवै प्रख्यातस्त्रिषु लोकेषु मदा
गुणपरिग्रहः वेगवंतः प्लवंतो ये प्लवगा मारुतात्मज तेषां मुख्यतमं मन्ये त्वामहं कपिकुंजरः ॥११
अतिथिः किल पूज्यार्हः प्राकृतोपि विजानता धर्मं जिज्ञासमानेन किं पुनर्यादृशो भवान् ॥१२
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः पुत्रस्तस्यैव वेगेन सदृशः कपिकुंजरः ॥१३

यदिदं कन्दादिमपि वहु दृश्यते तदास्वाद्येत्यन्वयः ९ अस्माकमपि संबंधः त्वत्स्वामिकारणप्रयोजक इति शेषः तत्संबंधं वक्तुमाह
प्रख्यात इति भवान्महागुणपरिग्रहः वहुशी दृश्यं अस्ति त्रिषु लोकेषु प्रख्यातः ॥१० तादृशो त्वायेवेगवंतः प्लवगाः सन्तितेषां मुख्य
तममन्ये ॥११ भवान्यादृशस्तादृशः पूज्य इति किं पुनरिति योजना ॥१२ विवक्षितप्राशस्त्यमेवाहात्वं हीति ॥१३

18 हनूमद्द्वारकमारुतपूजायांकारणांतरमप्याह् पूजितेत्वयीति १७ द्विमः आकाशमद्विमः १८ ततः उक्तकारणात् एषसंबंधः कृतप्रयोजनकास्तु
रहकश्चत्वहृपः २० अस्मिन्कार्येप्रत्युपकाररूपेएवंगतेसतिचिरात्प्राप्तेसतिमयासमद्रेणचेतिशेषः त्वत्पूजास्वीकारेणतयोःप्रीतिंकर्तुं

पि२

पूजितेत्वयिधर्मज्ञेपूजांप्राप्नोतिमारुतः तस्मात्त्वंपूजनीयोमेशृणुचाप्यत्रकारणं ५ पूर्वंकृतयुगे
तातपर्वताःपक्षिणोभवन् तेहिजग्मुर्दिशःसर्वागरुडानिलवेगिनः ततस्तेषुप्रयातेषुदेवसंघाःसहर्षि
भिः भूतानिचभयंजग्मुस्तेषांपतनशंकया ततःक्रुद्धःसहस्राक्षःपर्वतानांशतक्रतुः पक्षांश्चिच्छे
दवज्रेणतत्रतत्रसहस्रशः समामुपगतःक्रुद्धोवज्रमुद्यम्यदेवराट् ततोहंसहसाक्षिप्तःश्वस
नेनमहात्मना अस्मिंल्लवणतोयेचप्रक्षिप्तःप्लवगोत्तम गुप्तपक्षःसमग्रश्चतवपित्राभिरक्षितः
ततोहंमानयामित्वांमान्योहिममभारुतः त्वयामेह्येषसंबंधःकपिमुख्यमहागुणः २० अस्मिन्नेवं
गतेकार्येसागरस्यममैवच प्रीतिंप्रीतमनाःकर्तुंत्वमर्हसिमहामते २१ श्रमंमोक्षयपूजांचगृह्या
णहरिसत्तममान्यस्यप्रीतोस्मितवदर्शनात् एवमुक्तःकपिश्रेष्ठस्तंनगोत्तममब्रवीत् प्रीतोस्मिकृत

प्रीतिंचमम

मर्हसि २१ मान्यस्यवायुसंबंधात्वरुण्यस्यममप्रीतिंकुरुइतिशेषः २२ मन्युःपूजांतंगीकारजंदैत्सं १० २९

[illegible]

श्री॰
वा॰रा॰
सुं॰टी॰
९

१ २४ शैलमालभस्वहस्तायदृस्तन्निवेति एतावद्यवनेपिश्रममारोप्यहृयायप्रयासपतयोरितिप्रह्लास्तः २५ उपपन्नाभिःतत्कालेप्रक्ताभिः

त्वरतेकार्यकालोमेप्रहश्चाप्यतिवर्तते प्रतिज्ञाचमयादत्तानस्थातव्यमिहांतरा २४ इत्यु
क्त्वापाणिनाशैलमालभ्यहरिपुंगव जगामाकाशमाविश्यवीर्यवान्प्रहसन्निव २५ सप
र्वतसमुद्राभ्यांबहुमानादवेक्षितः पूजितश्चोपपन्नाभिराशीर्भिरभिनंदितः २६ अथोर्ध्वं
दूरमात्सृत्यहित्वाशैलमहार्णवौ पितुःपंथानमासाद्यजगामविमलेंबरे २७ भूयश्चोर्ध्वग
तिंप्राप्यगिरिंतमवलोकयन् वायुसूनुर्निरालंबोजगामकपिकुंजरः २८ तत्द्वितीयंहनु
मतोदृष्ट्वाकर्मसुदुष्करं प्रशशंसुःसुराःसर्वेसिद्धाश्चपरमर्षयः २९ देवताश्चाभवन्हृष्टास्तत्र
स्थास्तस्यकर्मणा कांचनस्यसुनाभस्यसहस्राक्षश्चवासवः ३० उवाचवचनंधीमान्परितोषा
त्सगद्गदं सुनाभंपर्वतश्रेष्ठंस्वयमेवशचीपतिः ३१

अथेत्यूर्ध्वंयत्प्रदेशेस्थितस्ततोपिबहूर्ध्वंतंपितुःपंथानंवायुमा
र्गं २७ भूयऊर्ध्वंततोपिबहूर्ध्वंतंगिरिमधःप्रदेशवर्तिनवलोकयन् २८ तत्द्वितीयंकर्म प्रविश्यस्थैवपुनरुत्पतनरूपंकर्म २९
तत्रस्थामैनाकस्यःगगनस्थावातस्यकांचनकांचनमयस्यसुनाभस्यशोभननाभस्यमैनाकस्यकर्मणाजलाज्झ्यानरूपेणदेवता

20 अभयंस्वकृतपक्षच्छेदशंकाजनितभयाभावं २२ निर्भयस्यापिभयेसतीवोपचारार्थंसासंकृतंयतोतःपरितुष्टइत्यन्वयः २३ अवस्थितः न
लीनरसमग्रइत्यर्थः सागरंमैनाकाधिष्ठितसागरप्रदेशं २६ अथदैवैर्लंकाप्रविष्टस्यहनूमतःकार्यक्षमबलपरीक्षणार्थं सुरसाप्रवर्तनेन

हिरण्यनाभःशैलेंद्रःपरितुष्टोस्मितेनघ अभयंतेप्रयच्छामिगच्छसौम्ययथासुखं २२ साह्यंकृतं
तेसुमहद्विक्रांतस्यहनूमतः क्रमतोयोजनशतंनिर्भयस्यभयेसति २३ रामस्यैषहितायैवयाति
दाशरथेःकपिः सत्क्रियांकुर्वताशक्यातोषितोस्मिदृढंत्वया सतत्प्रहर्षमलभद्विपुलंपर्वतोत्तमः
देवतानांपतिंदृष्ट्वापरितुष्टंशतक्रतुं २५ सवैदत्तवरःशैलोबभूवावस्थितस्तदा हनूमांश्चमुहूर्तेन
व्यवक्राम सागरं २६ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः अब्रुवन्सूर्यसंकाशांसुरसांनागमा
तरम् २७ अयंवातात्मजःश्रीमान्प्लवतेसागरोपरि हनूमान्नामतस्यत्वंमुहूर्तंविघ्नमाचर २८
राक्षसंरूपमास्थायसुघोरंपर्वतोपमं दंष्ट्राकरालंपिंगाक्षंवक्त्रंकृत्वानभस्पृशं २९ बलमिच्छा
महेज्ञातुंभूयश्चास्यपराक्रमं त्वांविजेष्यत्युपायेनविषादंवागमिष्यति एवमुक्तातुसादेवी
दैवतैरभिसत्कृता समुद्रमध्येसुरसाबिभ्रतीराक्षसंवपुः ३०

ततइत्यादि २७ २८ नभस्पृशमितिपुंस्त्वमार्षं वक्त्रशब्दोर्धर्चादिर्वा २९ बलंज्ञानंबलं उपायबलंच पराक्रमंबलात्तमिच्छामहे तदेव

[illegible]

श्री वा रा टी २१

भयस्य च भयावहमिति पाठे सर्वलोकभयस्यापीत्यर्थः ४२ ईश्वरैर्देवैः ४२ एवं वरः शुश्रवागतस्य वदनप्रवेशाद्भयः इति उक्तेति शेषः सत्व
रात्वरामहितासास्यरसा ४४ प्रहृष्टवदनः दत्तभक्षणावरायाग्रेपि सकाशात्रिस्तारोपायज्ञानजो हर्षः ४४ ४६ कार्यविशक्तस्य

विकृतं च विरूपं च सर्वस्य च भयावहं त्वं समानं दत्वमंतं माहेन्मे दम्र वा वद ४२ मम भक्षः प्रदि
ष्टस्त्वमीश्वरैर्वानरर्षभ अद्य त्वां भक्षयिष्यामि प्रविशेदं ममाननं ४३ वर एष पुरा दत्तो मम धात्रे
ति सत्वरा व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ४४ एवमुक्तः सुरसया प्रहृष्टवदनोऽब्रवी
त् रामो दाशरथिर्नाम प्रविष्टो दंडकावनं ४५ लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया
अस्य कार्यविषक्तस्य बद्धवैरस्य राक्षसैः ४६ तस्य सीता हृता भार्या रावणेन यशस्विनी ४७
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् कर्तुमर्हसि रामस्य साह्यं विषयवासिनी ४८
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणं आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ४९

मायामृगवधे प्रसक्तस्य बद्धवैरस्य शूर्पणखाविरूपकरणादिकर्मणेति शेषः ४७ रामसाह्यकरणे हेतुः रामस्य विषयवासिनीति तस्य
सर्वाधिपतित्वात् ४८ रामं चेति दृष्ट्वा तूर्तातं च विज्ञाप्येति शेषः ४९

22 कश्चिदपि मां नातिवर्तेत अभिद्रुतो न गच्छेदित्यर्थः परस्मैपदमार्षं ।१५०। तं प्रयांतं इन रागच्छामीत्युक्त्वा वरदानं कृत्वापि प्रयान्तम्
वीक्ष्य हनूमतः तस्य बलं जिज्ञासमाना सुरसा वाक्यमब्रवीत् ।१५१। निविश्येति प्रविश्यैव गंतव्यं यदि शक्तिरस्तीत्यर्थः इत्यब्रवीदित्यन्वयः ।१५२

एवमुक्तो हनुमता सुरसा कामरूपिणी अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम ।१५०। तं प्रयांतं
समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् बलं जिज्ञासमाना सा नागमाता हनूमतः ।१५१। निविश्य
वदनं मेद्य गंतव्यं वानरोत्तम वर एष पुरा दत्तो मम धात्रेति सत्वरा ।१५२। व्यादाय विपुलं
वक्त्रं स्थिता सा मारुतेः पुरः एवमुक्तः सुरसया क्रुद्धो वानरपुंगवः ।१५३ अब्रवीत्कुरु वै व
क्त्रं येन मां विसहिष्यसि इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ।१५४ दशयोजनवि
स्तारो हनूमानभवत्तदा चकार सुरसाप्यास्यं विंशद्योजनमायतं ।१५५

।१५३ दशयोजनमायतो आयतवक्त्र इत्यर्थः ।१५४ चकार सुरसाप्यास्यं विंशद्योजनमायतमित्यनंतरं ततद्दृष्ट्वा व्यादितं त्वास्यमि
ति प्राचीनः पाठः तत्रद्दृष्ट्वा मेघसंकाशमित्यादि शतयोजनमायतमित्यंतश्लोकास्तु प्रक्षिप्ता इति कतकः ।१५५

श्री वा रा सुं टी २३

23 व्यादितं व्यात्तं दीर्घजिह्वत्वादिगुणविशिष्टं व्यात्तं तमस्याश्चास्यं दृष्ट्वेत्यन्वयः ५७ ५८ इदं वचनमितीदं शास्त्रार्थं प्रविष्टइति दाक्षायणि दक्षप्र

तं दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः स बुद्धिमान् दीर्घजिह्वं सुरसया सुभीमं नरकोपमं ५६ तं दृष्ट्वा

मेघसंकाशं विंशद्योजनमायतम् हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ५७ चका

र सुरसा वक्रं चत्वारिंशत्तथोच्छ्रितं बभूव हनुमान्वीरः पंचाशद्योजनोच्छ्रितः ५८ चका

र सुरसा वक्रं षष्टियोजनमुच्छ्रितं तदैव हनुमान्वीरः सप्ततियोजनोच्छ्रितः ५९ चका

र सुरसा वक्रं शतयोजनमायतम् स संक्षिप्यात्मनः कायं जीमूत इव मारुतिः ६० तस्मि

न्मुहूर्ते हनुमान्बभूवांगुष्ठमात्रकः ५७ सोभिपत्याशु तद्वक्रं निष्पत्य च महाबलः अंतरि

क्षे स्थितः श्रीमानिदं वचनमब्रवीत् ५८ प्रविष्टोस्मि हि ते वक्रं दाक्षायणि नमोस्तु ते गमि

ष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव ५९ तं दृष्ट्वा वदनान्मुक्तं चंद्रं राहुमुखादिव अब्रवीत्सुरसा देवी

स्वेन रूपेण वानरं ६० अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखं समानय च वैदेहीं राघवेण महात्मना

नापितसंताने व्रतपवनतिः सत्यश्चासीत्सत्यो जातस्तस्ययं वदनप्रवेशरूपस्तापत्यान्नस्य ५९६ प्रयसानशृहणाति अर्थसिद्ध्यैइतिराघ

[illegible]

24 त्तीर्यंसरसावक्रात्रिक्रमणात्तृपं ८२ ८३ वारिधारासेवितत्वादिविशेषणकेचंद्रसूर्यपथयेजगामेत्वन्वयः पतंगैःपक्षिभिःकौशिकं।
गानम्तत्यविद्यानदाचार्यैस्तुंबरुप्रभृतिगंधर्वैस्तुरितंसेवितं ऐरावतेश्वरतदीर्घेमिंद्रथनौरितितीर्थः गजविशेषस्तत्यने ८४ पतंगोर

नरत्तीर्यंदृष्टमतोहस्ताकर्मेसहकरं साधुसाधितिभूतानिप्रशशंसुस्तदाहरिं ८२ ससागरम
नाथघमभ्येत्यवरुणालयं जगामाकाशमाविश्यवेगेनगरुडोपमः ८३ सेवितेवारिधाराभिःप
तंगोस्तुनिषेविते चरितेकौशिकाचार्यैरैरावतनिषेविते ८४ सिंहकुंजरशार्दूलपतगोरगवाहनैः वि
मानैसंपतद्भिस्तुविमलैःसमलंकृते ८५ वज्राशनिसमाघातैःपावकैरिवशोभिते कृतपुण्यैर्महा
भागैःस्वर्गजिद्भिरधिष्ठिते ८६ वहताहव्यमत्यंतसेवितेचित्रभानुना ग्रहनक्षत्रचंद्रार्कतारागणा
विभूषिते ८७ महर्षिगणगंधर्वनागयक्षसमाकुले विविक्तेविमलेविश्वेविश्वावसुनिषेविते ८८
देवराजगजाक्रांतेचंद्रसूर्यपथेशिवे विताने जीवलोकस्यवितमलेब्रह्मनिर्मिते ८९ बहुशःसेविते
वीरैर्विद्याधरगणैर्वृते जगामवायुमार्गेचगरुत्मानिवमारुतिः ९० हनुमान्मेघजालानिप्रा

रगाःपक्षिसर्पाः ८५ वज्राशनिसमस्पर्शैस्तद्वत्प्राणहरैःपावकैःपंचाग्निभिरिवस्वर्गजिद्भिरधिष्ठिते समाघातैरितिपाठेता
भ्यांतत्यस्त्रागतेभिर्हतोयेषांतैरित्यर्थः ८६ चित्रभानुस्मापंचाग्निभिन्नोपमग्निश्चित्रभानुः ८७ विश्वेविश्वाश्रयेविश्वावसुर्गं

श्री
रा वा
सं टी
१३

25 ७२ ७३ ७४ आशिता कृतभोजना ७५ समाक्षिपत् जग्राह छायाग्रहणेन तद्गतिनिरोधशक्तिस्तस्या व्यञ्जिता ७६ पंगूकृतः स्तब्धगतिः परा
क्रमो यस्य ७७ महानौर्यथा पंगूकृतपराक्रमा मार्गस्तब्धगतिः प्रतिलोमेन वातेन प्रत्यग्देशगतिनिरोधप्रवाहस्तब्धगतिस्तथा यद्वा तेन यथावि

कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ७२ प्रावृ
षीन्दुरिवाभाति निष्पतन्प्रविशंस्तथा प्रदृश्यमानः सर्वत्र हनूमान्मारुतात्मजः ७३ भेजेम्बरं निरालंबं
पक्षयुक्त इवाद्रिराट् प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी ७४ मनसा चिंतयामास प्रवृद्धा का
मरूपिणी अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ७५ इदं मम महासत्त्वं चिरस्य वशमागतं
इति संचिंत्य मनसा छायामस्य समाक्षिपत् ७६ छायायां गृह्यमाणायां चिंतयामास वानरः
समाक्षिप्तोस्मि सहसा पंगूकृतपराक्रमः प्रतिलोमेन वातेन महानौरिव सागरे तिर्यगूर्ध्वमधश्चै
व वीक्षमाणस्तदा कपिः ७८ ददर्श स महासत्त्वमुत्थितं लवणांभसि तद्दृष्ट्वा चिंतयामास मारुति
र्विकृताननं ७९ कपिराजेन कथितं सत्त्वमद्भुतदर्शनं छायाग्राहि महावीर्यं तदिदं नात्र सं
शयः ८०

परीतगतिवारणाय यत्नैः स्तब्धगतिः कार्यते तथाहं केनचित् स्तब्धगतिः कृतः ७८ महासत्त्वं महद्रूपं प्राणिनं ७९ ८०

१३

26 बुद्ध्यर्थतत्त्वेन छायाग्रहणरूपार्थक्रियया ८१ पातालांबरसन्निभं पातालाकाशमध्यमार्गसदृशं ८२।८३ कायमात्रं स्वशरीरकवल
नपर्याप्तशरीरप्रमाणमित्यर्थः मात्रशब्दोऽल्पवाचीति कतकः मर्माणि च भेदनार्थं ददर्शेत्यन्वयः ८४ तस्या वक्त्रे आत्मानं मुहुः सं

स तां बुद्ध्यार्थतत्त्वेन सिंहिकां मतिमान्कपिः व्यवर्धत महाकायः प्रावृषीव बलाहकः ८१
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः वक्त्रं प्रसारयामास पातालांबरसन्निभम् ८२
घनराजीव गर्जन्ती वानरं समभिद्रवत् स ददर्श ततस्तस्या विवृतं सुमहन्मुखम् ८३ काय
मात्रं च मेधावी मर्माणि च महाकपिः स तस्या विवृते वक्त्रे वज्रसंहननः कपिः ८४ संक्षि
प्य मुहुरात्मानं निष्पपात महाकपिः आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः ८५ ग्रस्यमा
नं यथा चन्द्रं पूर्णं पर्वणि राहुणा ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः ८६ उत्पपा
ताथ वेगेन मनःसंपातविक्रमः तां तु दृष्ट्या च धृत्या च दाक्षिण्येन निपात्य सः ८७

क्षिप्य प्रविष्टं संजज्ञ्यातिष्ठ निष्पपातेत्यन्वयः ८५ ८६ मनःसंपातविक्रमः मनोवेगतुल्यवेगः दिष्ट्या दैवानुग्रहेण दृष्ट्येति पाठे स्मर
णदर्शनेनेत्यर्थः धृत्या सहजधैर्येण दाक्षिण्येन कलाविलक्षणत्वाच्चातुर्येण च तां निपात्य तिहृत्य वेगेनोत्पपात ८७

श्री
वा रा
स टी
१८

27 ननप्रथमप्रहृत्रवेगस्य सरसादिभिः उद्दीभावे सति कथं पुनराकाशगमनं तत्राह ग्रात्मवान्वायोरिवस्वाधीनपवनगमनविषयो वन्नः प्रथ
मेवम्राकाशमार्गप्राप्तिमात्रायमहोद्रपर्वतालंवनमिति रजनप्रतारणायवे त्याह हृतहृतधस्तहृद्यलक्षणप्राणस्थानाद्युतपवविधुराप्रा
णभृतार्थं भमिपपात अत्रकविनेत्ततेनेतस्याः छायाग्रहणमात्रेणभक्षणादिशक्तिमत्त्वाः सिंहिकायानिपातनेनिपातनमिमिन्नराव

कपिप्रवीरो वेगेन वह्वध्येऽनरात्मवान् हृतहृत्सादनमनापपात विधुरां भमि स्वयंभ्वैव।
नमान्स्ट्रहृत्स्त्वस्यानिपातते ८८ नोदन्तावानरेणाभ्युपतितां वीक्ष्य सिंहिकां भूतान्याका
शचारीणितमभुः स्वयोनमं भीममस्यहृतं कर्ममः हृत्स्त्वं त्वयाद्दतं साधयाथामभि
प्रेतमरिष्टं त्वं वतावर ९० यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव धृतिर्दृष्टिर्मतिर्दाक्ष्यं स
कर्मस्त न सीदति ९१ स तैः संस्तुतितः स्तुत्यः प्रतिपन्नप्रयोजनः जगामाकाशमाविश्य पन्न
गाशनवत् कपिः ९२

नाशयस्वात्मातूपरामवत्स्वस्वरूपोहनुमानस्य ८८ ८९ मदन्तं त्वमहा बलाराक्षसी रावणावदेशकं संदारालयासंहृतेनपथिः
प्ररिष्टंबाधारहितं विष्टिंसायां ९० निर्वाय कर्मसाधनेदेनमाह यस्य त्विति ९१ संतैः संस्तुतः तैः एवोक्तभूतैः प्रतिपन्नप्रयोजनः खमि

28 प्राग्भूयिष्ठःप्राग्कल्पःपार्श्वोयेनसः ९३ पतन्नेवगच्छन्नेव मलयोपवनानि अनेनोत्तरतीरवद्दक्षिणतीरेपिमलयाख्यः पर्वतोस्ती
तिगम्यते ९४ सागरंदक्षिणतीरसमीपवर्तिसागरं अनूपःकच्छदेशः सागरस्यपत्नीनांनदीनांमुखानिसंगस्थानानि
नदीनांमुखानिसंगस्थानानिविलोकयन्व्यलोकयत् ९५ आत्मानंस्वशरीरंमहत्तादाकाशंनिरुंधंतमिव मतिंकर्तव्यनिश्चयं ९६ ९

प्राग्भूयिष्ठपार्श्वःससर्वतःपरिलोकयन् योजनानांशतस्यांतेवनराजीददर्शसः ९३ ददर्श
चपतंस्तेनविविधद्रुमभूषितं ज्ञायंशाखामृगश्रेष्ठोमलयोपवनानिच ९४ सागरंसागरा
नूपान्सागरानूपजान्द्रुमान् सागरस्यचपत्नीनांमुखान्यपिविलोकयन् ९५ समहामेघसं
काशंसमीक्ष्यात्मानमात्मवान् निरुंधंतमिवाकाशंचकारमतिमान्मतिं ९६ कायवृद्धिंप्रवेगं
चममदृष्ट्वैवराक्षसाः मयिकौतूहलंकुर्युरितिमेनेमहामतिः ९७ ततःशरीरंसंक्षिप्यतन्महो
धरसंनिभं पुनःप्रकृतिमापेदेवीतमोहइवात्मवान् ९८ तद्रूपमतिसंक्षिप्यहनूमान्प्रकृ
तौस्थितः त्रीन्क्रमानिवविक्रम्यबलिवीर्यहरोहरिः ९९

कौतूहलमाश्चर्यधियादिदृक्षामित्यर्थः ९७ प्रकृ
तिंनिजमाकारंवीतमोहःनष्टवासनावशादागतःकामादिमोहोयस्यसः आत्मवानजीवन्मुक्तयोगी प्रकृतिंभगवदनन्यतत्वता
लक्षणस्वभावमित्यर्थः ९८ अतिसंक्षिप्यअतिसंकोच्य त्रीन्क्रमान्पदानिविक्रम्यप्रक्षिप्यबलेर्वीर्यस्यहर्ताविष्णुरिवप्रेतोस्थितः

श्री
वा रा
ल टी
२८

29 वाक्तनानाविधरूपधारी नानावर्णाकृतिरूपधारी तत्त्वतज्ज्ञाने ष्मस्पष्टं परैरशक्यं समुद्रतीरमासाद्य सन्वयः समीक्षितात्मा समालोकिता
निप्रमाणस्वशरीरः समवेक्षितार्थः ष्वलोचितानांतरकार्यः प्रतिपन्नरूपः ष्वंगीकृतस्वल्परेहो भूदिति शेषः २०० लंबस्यलंबाख्यस्य विचि

स वाक्तनानाविधरूपधारी परं समासाद्य समुद्रतीरं परैरशक्यं प्रतिपन्नरूपः समीक्षितात्मा
समवेक्षितार्थः २०० ततः स लंबस्य गिरेः समृद्धे विचित्रकूटे निपपात कूटे सकेतकोद्दा
लकनारिकेले महाद्रिकूटप्रतिमो महात्मा २०१ ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लंकां
गिरिवर्यमूर्ध्नि कपिस्ततस्मिन्निपपात पर्वते विधूय रूपं व्यथयन् मृगद्विजान् २०२

त्राणि कूटानि शृंगाणि नरश्मिवराणि यस्य तादृशे कूटे शिखरे उद्दालकः श्लेष्मातकः २०१ गिरिवर्यमूर्ध्नि स्थितामिति शेषः उपसं
हरति कपिस्त्विति सकलैः कथ्यमानविशेषणसागरमीणाक्रम्य तस्मिन् लंबाख्यपर्वते मृगादीन् पीडयन्निपपात निपत्य च ततः प्राची

८ त्रूपं विधूय महोदये क्षीरः समावतीमिव स्थितां
तां कांददर्शः २०२

30 २०३ इतिश्रीरामायणेवाल्मीकीयेसुंदरकांडेप्रथमःसर्गः १ त्रिकूटस्यलंवापरपर्यायस्यपर्वतस्यतटेस्थितःस्वस्थोभूत्वालंकांददर्श १
पुष्पमयःपुष्पमयःपुष्पमयवानरउव २ प्रतिमुमसतमममप्लसहितः नदेवाह नग्लानिमितिकविवाक्यमेतत् ३ शृंद

ससागरंदानवपन्नगायुतंबलेनविक्रम्यमहोर्मिमालिनं निपत्यतीरेचमहोदधेस्तदाददर्श
लंकाममरावतीमिव २०३ नगरमानः इत्यार्षेरामायणेसुंदरकांडेप्रथमःसर्गः १ स
सागरमनाधृष्यमतिक्रम्यमहाबलः त्रिकूटस्यतटेलंकांस्थितःस्वस्थोददर्शह १ ततः
पादपमुक्तेनपुष्पवर्षेणवीर्यवान् अभिवृष्टस्तत्रतस्थौबभौपुष्पमयोहरिः २ योजनानां
शतंश्रीमानतीर्त्वाप्युत्तमविक्रमः अनिःश्वसन्कपिस्तत्रनग्लानिमधिगच्छति ३ शता
न्यहंयोजनानांक्रमेयंसुबहून्यपि किंपुनःसागरस्यांतंसंख्यातंशतयोजनं ४ सतु
वीर्यवतांश्रेष्ठःप्लवतामपिचोत्तमः जगामवेगवान्लंकांलंघयित्वामहोदधिं ५ शा
द्वलानिचनीलानिगंधवंतिवनानिच मधुमंतिचमध्येनजगामनगवंतिच ६

योजनानांबहूनिशतान्यपिक्रमेयंक्रामेयंक्रमितशक्तः शतयोजनमितिसंख्यातंसागरस्यांतंपरंपारंक्रामेयमितिकागणना
ममेतिमन्वतेस्मेतिशेषःइनमदभिप्रायानुवादःकवेः ४ जगामलंकापर्वतशिखरादवरुह्येतिशेषः ५ मध्येनजगाममध्य

मार्गेनवनादीनुपमपनजनाम नगवंतिवृत्तवं
तिप्राशास्येमत ५ ६

श्री
वा॰ रा॰
सं॰ टी॰
१८

31 शैलान्नलंबगिरिपादद्रुपात् ७ स तस्मिन्नलंबपर्वते तिष्ठन् लंकाया वनान्युपवनानि च ददर्श अपि च स पवनात्मजः नगाग्रे लंकां नगाग्रेप
र्वताग्रे स्थितां ददर्श ८ अस्यैव प्रपंचः सरलानित्यादि मुचुलिंदा जंबीरास्ताङ्गः ९ गंधपूर्णा नीपा धाराख्याः १०।११ रावणेन यावल्लात्रस्या

शैलांश्च नगसंकाशान्वनराजीश्च पुष्पिताः अभिचक्राम तेजस्वी हनूमान्प्लवगर्षभः ७ स
तस्मिन्नचले तिष्ठन्वनान्युपवनानि च स नगाग्रे स्थितां लंकां ददर्श पवनात्मजः ८ सर
लान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् प्रियालान्मुचुलिंदांश्च कुटजान्केतकानपि ९
प्रियंगून्गंधपूर्णांश्च नीपान्सप्तच्छदांस्तथा असनान्कोविदारांश्च करवीरांश्च पुष्पितान् १०
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ११
हंसकारंडवाकीर्णा वापीः पद्मोत्पलयुताः आक्रीडान्विविधान्रम्यान्विविधांश्च जलाश
यान् १२ संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः उद्यानानि च रम्याणि ददर्श कपिकुंजरः १३
समासाद्य च लक्ष्मीवाँल्लंकां रावणपालितां परिखाभिः सपद्माभिः सोत्पलाभिरलंकृतां १४

सर्ववृक्षाः सर्वदा पुष्पिता इति न कश्चिद्विरोधः आक्रीडाः क्रीडापर्वता इति कतकः साधारणोद्यानान्याक्रीडा इत्यन्ये राजमसाधारणान्यु
द्यानान्याक्रीडा इति तीर्थः १२।१३ समासाद्य लंकां लंकासमीपं प्राप्य वक्ष्यमाणविशेषणां लंकां ददर्शेत्यन्वयः १४

32 सीतापहारणात्सीतां लंकायामपहृत्यस्थापनाद्धेतोरित्यर्थः राक्षसाश्चरक्षणीकरणाभूताः १५ १६ प्रतोलीरथ्या तासां पांडुरत्वमसंवृतत्वं वनत्र
त्वसौधसंबंधहीनत्वं अट्टालकः प्रकारशिरांसि पताकाध्वजपटः तद्युक्तध्वजशोभितां १७ लतापंक्तिः तवाकारचित्रविशेषास्तया
विराजितैः शोभमानैः तोरणैर्युक्तां देवरंद्रः देवपुरीममरावतीमिव अनेनपरत्नमरादिहृतत्वोभावः सूचितइति वोध्यं १८ गिरि

सीतापहारणात्तेन रावणेन सु‾क्षिता समंताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः १५
कांचनेनावृतां रम्यां प्राकारेण महापुरीं ग्रहैश्चवारिसंकाशैः शारदांबुदसन्निभैः १६
पांडुराभिप्रतोलीभिरुच्चाभिरभिसंहृतां अट्टालकशताकीर्णांपताकाध्वजशोभितां १७
तोरणैःकांचनैर्दिव्यैर्लतापंक्तिविराजितैः ददर्शहनुमानलंकांदेवोदेवपुरीमिव १८
गिरिमूर्ध्निस्थितांलंकांपांडुरैर्भवनैःशुभैः ददर्शसकपिःश्रीमान्पुरीमाकाशगामिव १९
पालितांराक्षसेंद्रेणनिर्मितांविश्वकर्मणा प्लवमानामिवाकालेददर्शहनुमान्कपिः २०

मूर्धस्थत्वादाकाशपुरीयमेषतालंकाया १९ गिरिमूर्धस्थत्वादेवाकाशेप्लवमानामिवलंकांदृष्टहनूमानरवनद्वर्णनप्रसक्तस्य
कवेरपिआश्चर्यमयतयाददर्शेतिपुनरुक्तिर्नदोषाविस्मयेनपुनःपुनर्ददर्शेतिवातत्पर्यम् २०

श्री
वा॰रा॰
सुं॰टी॰
८

33 लंकां स्त्रीत्वेन वर्णयति वप्रेति वप्रप्राकाराभ्यंतरवेदिकातद्युक्तप्राकार एव जघनं विपुलांबुः समुद्रः वनानि चांबरं वासो यस्यास्तां
प्रशांतं बुशब्देन परिखांतर्गतं जलमिति तीर्थः २१ विश्वकर्मणा निर्मितां तेनापि मनसा कृतामिव स्थितां द्वारमुत्तरमासाद्य समुद्रदक्षिण
तटे स्थवनेनैतस्यैव वप्रस्य प्रथमं प्राप्तेः चिंतावद्यमाणप्रकारा २२ कैलासनिलयः स्थानं यस्याः अलकद्वारस्य तत्प्रख्यमुत्तरद्वारं उच्छ्रितैर्भ

वप्रप्राकारजघनां विपुलांबुनवांबरां शतघ्नीशूलकेशांतामट्टालकवतंसकां २१ म
नसेव कृतां लंकां निर्मितां विश्वकर्मणा द्वारमुत्तरमासाद्य चिंतयामास वानरः २२
कैलासनिलयप्रख्यामालिखंतीमिवांबरे डीयमानामिवाकाशमुच्छ्रितैर्भवनोत्तमैः २३
संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः रावणं च
रिपुं घोरं चिंतयामास वानरः २४ आगतापीह हरयो भविष्यंति निरर्थकाः न हि युद्धेन वै लं
का शक्या जेतुं सुरैरपि २५

वनोत्तमैरालिखंतीमिवाभ्राकाशं डीयमानामिवाभ्राकाशपुरतः ऊर्ध्वं दिव २३ यतद्ग्रे संपूर्णां राक्षसैर्घोरैः रौद्रैः नागाभोगविशेषैर्विवति
पूर्वः ३नवत्यादिमिति कतकः रावणः पूर्णो नगरी तस्या महतीं गुप्तिं रिपुं रावणं च सागरं निरीक्ष्य चिंतयामास मादरे चिंतयामास त
थः चिंताप्रकारः आगतापीति अपिना आगमनमेवाशक्यमपि पश्चैव सागरनिरीक्षणेन सचिंता सुरैरपि नेतुमशक्या यदतः २५ ८ २५

34

इमां त्विति पुरविषमां न विद्यते विषमं यतस्तां प्राप्यापि योत्स्यपि नापदानित्वादागमनमेवाशक्यमिति सूचितं किं करिष्यति राघवः
प्रायोराघवस्यापि दुःसाध्येत्यर्थः २६ अवकाश इति उचितार्थत्वाद्बलदर्पपराक्रमसंपन्नत्वात्सुग्रीवस्य च प्रकृतिना च नला
मादीनामवकाश इति भावः २७ एवंमागत्यापि दुःसाध्यत्वमुक्तमिदानीं सर्ववानरागमनासंभव एवेत्याह चतुर्णामेवेति २८ ननु जा

इमां त्वविषमां लंकां दुर्गां रावणपालितां प्राप्यापि समहाबाहुः किं करिष्यति राघवः २६

अवकाशो न सांत्वस्य राक्षसेष्वभिगम्यते न दानस्य न भेदस्य नैव युद्धस्य दृश्यते २७

चतुर्णामेव हि गतिर्वानराणां महात्मनां वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः २८

यावज्जानामि वैदेहीं यदि जीवति वा न वा तत्रैव चिंतयिष्यामि दृष्ट्वा तां जनकात्मजां २९

ततः संचिंतयामास मुहूर्तं कपिकुंजरः गिरेः शृंगे स्थितस्तस्मिन्रामस्याभ्युदये ततः ३०

अनेन तु रूपेण मया न शक्या रक्षसां पुरी प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ३१ म

हौजसो महावीर्या बलवंतश्च राक्षसाः वंचनीया मया सर्वे जानकीं परिमार्गता ३२

नकी जीवनज्ञानेन तत्समाधानं यवलावलादि चिंतातस्तद्दर्शनचिंतैव प्रथमं प्रसक्तेत्याह यावज्जानामीति यावत्प्रवेशेनिलदृत्तास्येशस्य
र्थः नतत्रैव जानकीदर्शनविषय एव प्रथमितिशेषः प्रथमं तां दृष्ट्वा पश्चाद्यच्चिंत्यं तत्तदानीमेव चिंतयामीति शेषः ३१ रामस्याभ्युद

यं तदभ्युदयतत्रूपसीतान्वेषणोपायं ३. चिंताप्र
कारोऽनेनेति ३१।३२

श्री रा सुं टी ५

35 लङ्कां कार्यं प्रच्छन्नत्वान्ममेयं तच्छन्दलक्ष्यं चैद्रियागोचरमिममर्थः मदन्तुतं सीतान्वेषणरूपं साधयितुं तेन रूपेण लंकापुरं प्रवेष्टुमाप्त
कालं उचितं २२ तेन रूपेणाप्यन्वेषणं कथं चरेदेतेति प्रश्नस्थिरयति तां पुरीमिति ३थ नेतिरहिते एकांते कथं पश्येयमित्यन्वयः ३३

लब्धालक्ष्येण रूपेण रात्रौ लंकापुरी मया प्राप्तकाले प्रवेष्टुं मे कृत्यं साधयितुं महत्
तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः हनूमांश्चिन्तयामास विनिःश्वस्य मुहुर्मुहुः ३४
केनोपायेन पश्येयं मैथिलीं जनकात्मजां अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ३५
न विनश्येत्कथं कार्यं रामस्य विदितात्मनः एकामेकश्च पश्येयं रहिते जनकात्मजां ३६
भूताश्चार्था विनश्यन्ति देशकालविरोधिताः विक्लवं दूतमासाद्य तमः सूर्योदये
यथा ३७

न नश्येतादर्शने किमर्थमेकांतापेक्षानत्राह भूतार्थाः सिद्धप्रायकार्याणि विक्लवं कातरं अविमृश्यकारिणं दूतमासाद्य देशकाला
भ्यां उचितप्रवृत्तिहीनाभ्यां विरोधिताः संतः सूर्योदये तमइव विनश्यंति अतोऽसहायेन मयैतादृशे देशे काले कार्यं चरन्नेव प्रवर्तितव्यमिति

३६ नकेवलंकार्यहानिकिंतग्रन्तदपिस्यादित्याह ग्रर्थानर्थांतरेष्विति ग्रथानर्थांतरेकार्याकार्यविषयेनिश्चितापिस्थासितास्यचिवे।
सहनिश्चितापिबुद्धिःनशोभतेविक्लवंहृतमासाद्येतिशेषः तदेवद्रढयति ध्वांतयंतीतिएवंसतिलोकास्वस्वामिनंबुद्धिशून्यमपि
जानीयादित्याशयः ३८ यदेवमतःकार्यंनविनश्येत् वैक्लव्यंबुद्धिहीनतातत्प्रसिद्धिःस्वस्यस्वामिनश्च ३९ रावणानर्थंरावा

ग्रर्थानर्थांतरेबुद्धिर्निश्चितापिनशोभते ध्वांतयंतीहकार्याणिहताःपंडितमानिनः ३८
नविनश्येत्कथंकार्यंवैक्लव्यंनकथंभवेत् लंघनेचसमुद्रस्यकथंननभवेद्दया ३९
मपिदृष्टेनरक्षोभिरामस्यविदितात्मनः भवेत्स्वार्थमिदंकार्यंरावणानर्थमिच्छतः ४०
नदृश्यंक्वचित्स्यानमविज्ञातेनराक्षसैः ग्रपिराक्षसरूपेणकिमुतान्येनकेनचित् ४१
वायुरप्यत्रनाज्ञातश्चरेदितिमतिर्मम नह्यत्रविदितंकिंचिद्रक्षसांभीमकर्मणां ४२

एवंयं ४० ग्रदर्शनेनसंचारश्चसर्वथाशक्यइत्याह नदृश्येति ४१ रक्षसामविदितंरक्षोभिरविदितंनकिंचिदस्तिकुत्रिमरूपमि
तिशेषः तःप्राकृतसहजकपिरूपेणैवस्यातत्समितिभावः ४२

37 किंच यावदस्तमयं स्वगोपनमेवोचितमित्याह इहेति स्वेन रूपेण संवृतः सन्युक्तः सन् इहाद्रिदेशे चेद्यदि तिष्ठामि तदा रक्षःपरैर्ज्ञाय
मानत्वात् विनाशमुपयास्यामि भर्तुरर्थश्च हास्यति नश्यति तस्मादासायमत्रैव क्वचिद्गिरिगुहायां तिः शंकः स्थित्वा रजन्यामपि स्वेन रूपेणाव

इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः विनाशमुपयास्यामि भर्तुरर्थश्च हास्यति ४३ तद
हं स्वेन रूपेण रजन्यां ह्रस्वतां गतः लंकामभिपतिष्यामि रावणस्यार्थसिद्धये ४४ रावणस्य
पुरीं रात्रौ प्रविश्य सुदुरासदां प्रविश्य भवनं सर्वं द्रक्ष्यामि जनकात्मजां ४५ इति निश्चित्य ह
नुमान्सूर्यस्यास्तमयं कपिः आचकांक्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ४६ सूर्ये चास्तं ग
ते रात्रौ देहं संक्षिप्य मारुतिः वृषदंशकमात्रोथ बभूवाद्भुतदर्शनः ४७ प्रदोषकाले हनुमां
स्तूर्णमुत्पत्य वीर्यवान् प्रविवेश पुरीं रम्यां प्रविभक्तमहापथां ४८ प्रासादमालाविततां
स्तंभैः शातकुंभनिभैर्गंधर्वनगरोपमां ४९
कांचनसंनिभैः जाले

एवं तदहं ह्रस्वतां गतो भूत्वा लंकामभिपतिष्यामीत्यन्वयः ४४ प्रथमतः पुरीं प्रविश्य ततः सर्वं भवनं रावणागृहं प्रविश्य ४५ ४६ वृषान्मू
षकान् दशतीति वृषदंशो मार्जारस्तन्मात्रस्तत्प्रमाणः ४७ प्रविवेश पुरीमिति प्रवेशस्य कालेषणमंतेयोक्तिः ४८ स्तंभैर्याते

38 सप्तेति भूमीनां समूहैः सप्तसंख्यावयवयुक्तैरुपलक्षितां स्फाटिकसंकीर्णैः स्फाटिकरत्नखचितैः स्थलैरित्यर्थः स्थलं भूतलैरिति
पाठे विषमपदार्थः तैस्तैः प्रासादैरिति शेषः ५० रत्नसंतोरणानि रक्षोगृहद्वारस्थतोरणानि ५१ अचिन्त्यागाराशक्यान्वेषणाचिं

सप्तभौमाष्टभौमैश्च स ददर्श महापुरीं स्थलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ५०
तैस्तैः शुशुभिरे तानि भवनान्यत्र रक्षसां ५० कांचनानि विचित्राणि तोरणानि च रक्षसां
लंकामुद्योतयामासुः सर्वतः समलंकृता ५१ अचिंत्यामद्भुताकारां दृष्ट्वा लंकां महाकपिः
आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ५२ स पाण्डुराविद्धविमानमालिनीं महार्हजां
बूनदजालतोरणां यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः सुपालितां ५३

ता जयं विषाददेतुः अद्भुताकारामिति हर्षहेतुः ५२ पांडुराः सुधाधवला आविद्धाः परस्परसंविद्धा विमानानां सप्तभूमिप्रासादा
नां माला यस्यामस्ति तां विप्रवेशेति शेषः ५३

श्री वा रा सुं टी. २ 39

मध्यगतः अनेकसहस्ररश्मिरनेनशोभनं अनेकेत्यस्यैव सहस्ररश्मेरनेनविवरणं अतिष्ठतेइत्यार्षस्तङ् ज्योत्स्नावितानेनलोकान्वितत्यप्रावार्य स
म्यगवलोकनसाधनं तथाप्युदन्तमतः साचिव्यसाहाय्यं कुर्वन्निव नन्वत्वमध्यगतस्य प्रदोषेउदयोक्ष्मानन्तदासंगस्यतन्नत्वमध्य
गतस्योदयइतिचेन्न शुक्लेकादश्यां खमध्यसमीपगतत्वेनमध्यगतोपचारात् शुक्लत्वचपूर्णकल्पत्वेनव्यवहारतं यद्वा अनेकनक्षत्र
सहस्ररश्मयोयस्येतिमध्यमपदलोपितत्पुरुषगर्भोबहुव्रीहिः मतपवराजिशेषेदन्नमनस्यशोकवतिकास्थसीतीसविधेरावस्थामनका

चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ज्योत्स्नावितानेन वितत्य लोकान्
तिष्ठतेनेकसहस्ररश्मिः ५४ शंखप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानम् दद
र्श चंद्रं स कपिप्रवीरः पोप्लूयमानं सरसी ५५ इत्यार्षे श्रीरामायणे सुंदरकांडे द्वितीयः सर्गः २

दीपिकाव्याख्यानं कृतं नैनाहन्तदाचंद्रास्तान्नमानं साद्वेयं मार्गशीर्षस्य फाल्गुने लंकाप्रविष्टायाः सीतायाः वर्तते दशमो मासो द्वितीयमशे
षोल्लंघनमेतिहन्नमितं प्रतिवचनात् हरणादिनेपञ्चसीतायाः लंकाप्रवेशनेरामभयादिनिस्यहमेव ५४ पोप्लूयमानं भ्रश्यत्प्लवमान
५५ हंसोमानः ५५ इत्यार्षे रामायणे सुंदरकांडे द्वितीयः सर्गः २

२०

40 त्वंवशिखरेऽनन्तशिखरे त्वंवेलंवाख्यापर्वते ग्रनपवलंवतोयदसन्निभे सत्वसत्वगुणासमेपेक्षितवलंच रजस्तमःप्रधानरक्तोजया
यसत्वगुणाश्रयेणमेधावीकालोचितविचारतः २ सागरोयनिर्घोषा सागरशाह्वसदृशरन्तः शाह्ववती ३ विटपावतोग्रलका

सत्वंवशिखरेलंवेलं वतोयदसन्निभे सत्वमास्थायमेधावीदत्वमाग्माकृतात्मज ः १
निशालंकामहासत्वोविवेशाकपिकुंजरः रम्यकाननंतोयाढ्यांपुरीरावणपालितां २
शारदांवुधरप्रख्यैर्भवनैरुपशोभितां सागरोपमनिर्घोषांसागरानिलसेवितां ३
सुपुष्टवलसंपुष्टांयथैवविटपावतीं चारुतोरणनिर्यूहांपांडुरद्वारतोरणां ४ भुज
गाचरितांगुप्तांशुभांभोगवतीमिव तांसविद्युद्घनाकीर्णांज्योतिर्गणविषेवितां ५

पुरीनिर्यूहोमत्तवारणः चारुस्तोरणोस्यतिशूहोयस्यांतां पांडुरेसुधायवलेद्वारेतोरणांयस्यांतां ४ भुजगैरामचरितांक्र
संचारां भोगवतीसर्पनगरीसविद्युद्भिर्घनैर्व्याप्तां ज्योतिषांग्रहदत्तादीनांगणैर्निषेवितामिवभ्रमरान्वपि ५ ५

श्री वा रा सुं टी ४१

५। वैरमास्तृतानां परिवृढादीनां शाखेयस्यां तादृशीममरावतीमिव स्थितां अमरा अमराः संत्यस्यामित्यमरावतीयोः असंज्ञायामपि मतोर्वक्त
वस्त्यादिषु दीर्घः नन्विंद्रपुरी अमरावती उक्तलक्षणाभावात् लंकायाः उक्तपुराहृश्य च सालंकारत्वात् सर्वत्वात्तत्वलवदघोषवाङ्
त्याच्चेति कनकः शातकुंभेन स्वर्णमयेन ६ किंकिणीजालैः क्षुद्रघंटिकासमूहैः घोषोयासां ताभिः ७ वैडूर्यमणिभिः कृतावेदिका

वैरमास्त्तनिर्दिष्टां तथाप्यमरावतीं शातकुंभेन महता प्राकारेणाभिसंवृतां ६ किंकिणी
जालघोषाभिः पताकाभिरलंकृतां प्रासादसहस्राढ्यां प्राकारसभियेदिवाम् ७ विस्मया
विष्टहृदयः पुरीमालोक्य सर्वतः जांबूनदमयैर्द्वारैर्वैडूर्यकृतवेदिकैः ८ मणिस्फटिकमु
क्ताभिर्मणिकुट्टिमभूषितैः तप्तहाटकनिर्यूहैराजतामलपांडुरैः ९ वैडूर्यकृतसोपा
नैः स्फाटिकांतरकुट्टिमैः चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः १०

सुवर्णमयैस्तादृशैर्द्वारैः ८ मणिस्फटिकमुक्ताभिः कृतवेदिकैर्द्वारैः सर्वतउपलक्षितां कुट्टिमानि बद्धभूमयः निर्यूहाः मत्तवारणाः राजता
मलपांडुरैः रजतमयामलपांडुरैः परिप्रदेशैः सर्वत्र द्वारैर्विशेष्यं ९ वैडूर्यमणिभिः कृतानि सोपानानि येषु तैः स्फाटिकाः स्फटिकरचि
तान्यंतरमध्यप्रदेशाग्रभूमयः सर्वतसु येषु तैर्द्वारैः चारुसंजवनैः सभातिरूपैर्नेरिव शुभैर्गृहैरुपलक्षितैर्द्वारैः १०

४१

42 संघुष्टैः कृतनिर्घोषैर्द्विजैः ॥ वसौकसाराग्रलकानतस्तद्दर्शनादस्य अर्थः जातहृष्टः सयद्वा त्वामाहर्षं स्वमिवोत्पतितां गिरिमूर्द्धि प्रति
ष्ठितत्वात् ।२।४ अन्येन धर्षयितुमशक्या किं सर्वथा तेन्याह प्रसिद्धा प्रकर्षेण सिद्धा नातिका ॥ ऋशपर्वणा ऋशपर्वसदृशालो

क्रौंचबर्हिणसंघुष्टैः राजहंसनिषेवितैः तूर्याभरणनिर्घोषैः सर्वतः परिनादितां ॥१
वसौकसारप्रतिमां समीक्ष्य नगरीं ततः स्वमिवोत्पतितां लंकां जहर्ष हनुमान्कपिः ॥२
तां समीक्ष्य पुरीं लंकां राक्षसाधिपतेः शुभां अनन्तमास्ते हिमतीं चिंतयामास वीर्यवान् ॥३
नेयमन्येन नगरी शक्या धर्षयितुं बलात् रक्षिता रावणबलैरुद्यतायुधपाणिभिः ॥४
कुमुदांगदयोर्वापि सुषेणस्य महाकपेः प्रसिद्धेयं भवेद्भूमिर्मैंदद्विविदयोरपि ॥५ विव
स्वतस्तनूजस्य हरेश्च ऋशपर्वणः ऋक्षस्य कपिमुख्यस्य मम चैव गतिर्भवेत् ॥६ स
मीक्ष्य च महाबाहो राघवस्य पराक्रमं लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥७ २

भवतन्नुत्पर्यंकं ऋक्षस्य विशेषणं अतिदीर्घकदोर्लोमहतत्वात् कपिमुख्यस्येति विशेषणं चतस्यैव ममचैवगतिरस्यामिति भट्टि
शेषः ॥६ रामस्य पराक्रमं लक्ष्मणस्य विक्रान्तं शौर्यं च समीक्ष्य दृष्ट्वा पितदीयवाणैरीषत्कर खसेनि विचार्य प्रीतिमानभूत् अविष

श्री रा वा सुं टी २२

43 रत्नवसनोपेतां रत्नाकरत्वात् सरत्नप्राकारवाससं च गोष्ठान्यागाराणि चावतंसौ यस्यास्तां गोष्ठं गोशाला इदं वाजिशालादेरुपलक्षणं
यंत्राणि प्राकारोपरिस्थापितानि तानि यन्त्रागाराणि स्तनौ यस्यास्तां १८ तां प्रशस्तिं लंकां भास्वरैश्च महागृहैः चान्द्रकिरणैः १९ सा नगरी

तां रत्नवसनोपेतां गोष्ठागारावतंसिकां यंत्रागारस्तनीमृद्धां प्रमदामिव भूषितां १८ तां नष्टतिमि
रां दीपैर्भास्वरैश्च महागृहैः नगरीं राक्षसेंद्रस्य ददर्श स महाकपिः १९ अथ सा हरिशार्दूलं प्र
विशंतं महाकपिम् नगरी स्वेन रूपेण ददर्श पवनात्मजं २० सा तं हरिवरं दृष्ट्वा लंका रावणपा
लिता स्वयमेवोत्थिता तत्र विकृताननदर्शना २१ पुरस्तात्तस्य वीरस्य वायुसूनोरतिष्ठत
मुंचमाना महानादमब्रवीत्पवनात्मजं २२ कस्त्वं केन च कार्येण इह प्राप्तो वनालय कथयस्वे
ह यत्तत्त्वं यावत्प्राणा धरंति ते २३ न शक्यं खल्वियं लंका प्रवेष्टुं वानर त्वया रक्षिता रावणबले
रभिगुप्ता समंततः २४ अथ तामब्रवीद्वीरो हनूमानग्रतः स्थितां कथयिष्यामि तत्त्वं यन्मां त्वं प
रिपृच्छसि २५ ॥ ॥

स्वेन रूपेण पिशाचदेवतारूपेण दृष्ट्वा तं ददर्श २० स्वयमेवोत्थिता अनन्यप्रेरितेत्यावत् २१ अतिष्ठ
त देवतारूपं प्रकाशनवती २२ वनालय वानर तत्त्वं सत्यं २३ त्वया पश्चात्प्रवेष्टुं न शक्यं खल्विदं लंकां गमिष्यामीति वत् न शक्यतिपाठस्तु सगमः

सुंदर टी २२

44 अथनयाहृष्टोदनंमांस्त्वांप्रतिज्ञाय सत्त्वस्यावदेषाश्ज्ञावा सिंहिकावज्ज्ञाधावेतिनिर्गोलंतांपश्यतिकान्तमिति २६ आज्ञाप्रती
ज्ञातियोगपरिपालिका २७ अथापिकान्तंतत्राहग्रहंदीति स्वयंस्वदेवतास्वरूपेणेत्यर्थः ३० यत्त्ववानलंकाधिष्ठात्रितेनावरातत्वा

कात्वंविरूपनयनाघुरद्वारेवतिष्ठसे किमर्थंचापिमांक्रोधान्निर्भर्त्सयसिदारुणे २६
हनुमद्वचनंश्रुत्वालंकासाकामरूपिणी उवाचवचनंक्रुद्धापरुषंपवनात्मजं २७
अहंराक्षसराजस्यरावणस्यमहात्मनः आज्ञाप्रतीक्षादुर्धर्षारक्षामिनगरीमिमां २८
नशक्यामामवज्ञायप्रवेष्टुंनगरीमिमां अद्यप्राणैःपरित्यक्तःस्वप्स्यसेनिहतोमया २९
अहंहिनगरीलंकास्वयमेवप्लवङ्गम सर्वतःपरिरक्षामिअतस्तेकथितंमया ३० लं
कायावचनंश्रुत्वाहनुमान्मारुतात्मजः यत्नवान्सहरिश्रेष्ठःस्थितःशैलइवापरः ३१
सतांस्त्रीरूपविकृतांदृष्ट्वावानरपुंगवः आबभाषेथमेधावीसत्त्ववान्प्लवगर्षभः ३२ द्रक्ष्या
तद्विजयोपायेयत्नवान ३१ स्त्रीरूपविकृत मिनगरीलंकांसाट्टप्राकारतोरणां इत्यर्थमिहसंप्राप्तःपरंकौ
तौरूपां अथलत्थ्यश्रोमरस्तत्रश्रोमरसमाद अवभाषेइति ३२ द्रक्ष्यामीत्यर्थमिदंसंप्राप्तइत्यन्वयः दर्शनंप्रयोजनमहिशेपत्यर्थः ३३

श्री
रामा
सुं टी
२३

45 वनंकृत्रिमं काननमकृत्रिमं ३४ भूयोधिकंपरुषाक्षरंवाक्यंपुनर्बभाषेइतिसंबंधः ३५ ३६ अनिर्जित्यहुंनशक्यमित्युक्तेपिकस्मादिवस्तनोः

वनान्युपवनानीह लंकायाः काननानि च सर्वतोरक्ष्यते यस्मान्निगृह्य मा गमन्नीह मे ३४ तस्यतद्
वचनं श्रुत्वा लंका सा कामरूपिणी भूय एव पुनर्वाक्यं बभाषे परुषाक्षरं ३५ मामनिर्जित्य दु
र्बुद्धे राक्षसेश्वरपालिता न शक्या ह्यद्य ते द्रष्टुं पुरीयं वानराधम ३६ ततः स हरिशार्दूलस्ता
मुवाच निशाचरीं दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतं ३७ ततः कृत्वा महानादं सा वै लं
का भयंकरं तलेन वानरश्रेष्ठं ताडयामास वेगिता ३८ ततः स हरिशार्दूलो लंकया ताडि
तो भृशं ननाद सुमहानादं वीर्यवान्मारुतात्मजः ३९ ततः संवर्तयामास वामहस्तस्य सोंगुलीः
मुष्टिनाभिजघानैनां हनुमान्क्रोधमूर्छितः ४०

अहणापूर्वकंकेवलंदर्शनमात्रेणनकाङ्क्षतिइत्याशयेनाह ततःसह
ति सहनमान् ३७ वेगितासंजातवेगा ३८ महानादंननादेतिनिर्भयत्वद्योतनं ३९ अंगुलीःसंवर्तयामासमुष्टिंबबंधेत्यर्थः ४०

46 वामहस्तमुष्टिंवधेम्राशयमाह स्त्रीचेति तेनप्रहारेणवाममुष्टिकृतमदयताडनेनपीत्यर्थः विकृताननदर्शनाविकृतवक्त्रदृष्टि ५१ ५२
उद्विग्राभीता ग्रगर्विनंगर्वरहितं ५२ ग्रायस्वगाप्राणनाशंऊर्विस्मयः तत्रदेतः समयेइति स्त्रीनदंतत्वेतिशास्त्रमर्यादायामित्य

स्त्रीचेतिमन्यमानेनतानिक्रोधःस्वयंकृतः सातेनेनप्रहारेणविह्वलांगीनिशाचरी ५१
पपातसहसाभूमौविकृताननदर्शना ततस्तुहनुमान्वीरस्तांदृष्टाविनिपातितां कृ
पांचकारतेजस्वीमन्यमानस्त्रियंचतां ५२ ततोवैभृशमुद्विग्नालंकासागद्गदाक्षरं उवा
चगर्वितंवाक्यंहनूमंतंप्लवंगमं ५३ प्रसीदसुमहाबाहोत्रायस्वहरिसत्तम समयेसौ
म्यतिष्ठंतिसत्ववंतोमहाबलाः ५४ अहंतुनगरीलंकास्वयमेवप्लवंगम निर्जिताहंत्व
यावीरविक्रमेणमहाबलः ५५ इदंचतथ्यंशृणुमेब्रुवंत्यावैहरीश्वर स्वयंस्वयंभुवा
दत्तंवरदानंयथाममः यदात्वांवानरःकश्चिद्विक्रमाद्वशमानयेत् तदात्वयाहिविज्ञेयंर
क्षः ५६ यथाप्यहंलंकाधिष्ठात्रीदेवतात्वा रक्षसांभयमागतं ५७ तदर्जयातथापित्वयानिर्जिता ५८ इदंचतथ्यंशृणु त्वद
नुग्रहार्थमुच्यमानमित्यर्थः वरदानंदत्तंकृतमित्यर्थः ५९ रक्षसांभयमिति एवंचमेजेयोयंसर्वरक्षोजयसूचकइतिभावः ६०

श्री
वा॰ रा॰
सुं॰ टी॰
२५

47 न तस्यास्ति व्यतिक्रमः भगवद्दत्तवरस्य रावणस्य स्वहस्तापि तेयद्यभिमनं नंदिकेश्वरशापात्तस्य प्राप्तो विनाशः स्वयंभूवरवशाद्धानरास्कं
दन पर्यंतं प्राप्तेति वहृशतिकथायानुसंधेयेतितीर्थः ४९ विधत्स्वप्रतिनष्ट ५० शापोपहतां सत्यसंकल्पभगवद्वचने नंदिकेश्वरशापेन च प्रा
पितनाशकालां हरीश्वरस्त्वं प्रविश्य यदृच्छया स्वेच्छया सर्वत्र रावणांतःपुरपर्यंतं यथासुखं गतः सन् सतीम् अप्रकृतयातिसूक्ष्मानां

सदिमे समयः सोम्य प्राप्तोऽयं घनवद्वनात् स्वयंभूविहितः सम्यो न तस्यास्ति व्यतिक्रमः ४८ सीता
निमित्तं राज्ञस्त्वरावणस्य दुरात्मनः रक्षसां चैव निर्दिष्टो विनाशः समुपागतः ४९ तत्प्र
विश्य हरिश्रेष्ठ पुरीं रावणपालितां विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ५० प्रवि
श्य शापोपहतां हरीश्वरः पुरीं स्वभावात्समुत्थपालितां यदृच्छया त्वं जनकात्मजां सतीं
विमार्ग सर्वत्र गतो यथासुखं ५१ इत्यार्षे सुंदरकांडे द्वितीयः सर्गः २ स निर्जित्य पुरीं
लंकां श्रेष्ठां तां कामरूपिणीं विक्रमेण महातेजा हनूमान्कपिसत्तमः १ अद्वारेण म
हावीर्यः प्राकारमवपुप्लवे निशि लंकां महासत्त्वो विवेशाथ कपिकुंजरः २

नकीं विमार्गयान्वेषय अनेन च वचनेन सीतायाः कल्मषात्पुरे वर्तनं तरस्त्वुपदिष्टं ५१ अकाममानः इत्यार्षे सुंदरकांडे द्वितीयः सर्गः २
सउति १ प्राकारमद्वारेणावपुप्लवे शत्रोः पुरं यामगृह्य वा यद्वारेण प्रविशेच्छत्रुविनाशायेतिनीतिस्मृतेरितिभावः २

48 प्रक्रमेण प्रवेशोपि सव्यंपादं वा यस्मात्प्रथमतश्चक्रे यतः सतु प्रथमनिक्षिप्तवामपादस्तु शत्रूणांमूर्धन्येव तिष्ठति तथा विजयप्रदो भ
वतीति भावः उक्तंच प्रयाणकाले स्वगृहप्रवेशे विवाहकालेपि च दक्षिणांघ्रिं कृत्वाग्रतः शत्रुपुरप्रवेशे वामंनिदध्याच्चरणं
नृपालः इति ३ महापथं राजमार्गं ४ हसितैस्तैरट्टहासैरुत्कृष्टनिनदैस्तूर्यघोषैः पुरस्कृतानैरुपलक्षितां ५ व

प्रविश्य नगरीं लंकां कपिराजहितंकरः चक्रेथ पादं सव्यं च शत्रूणां सतु मूर्धनि ३
प्रविष्टः सत्वसंपन्नो निशायां मारुतात्मजः स महापथमास्थाय मुक्तपुष्पविराजितं ४
ततस्तु तां पुरीं लंकां रम्यामभिययौ कपिः हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्कृतैः ५
वज्रांकुशनिकाशैश्च वज्रजालविभूषितैः गृहमेघैः पुरी रम्या बभासे द्यौरिवांबुदैः ६
प्रजज्वाल तदा लंका रक्षोगणगृहैः शुभैः सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थिते ७
वर्धमानगृहैश्चापि सर्वतः सुविभूषितैः तां चित्रमाल्याभरणां कपिराजहितंकरः ८

ज्राणामंकुशानां निकाशाः प्रतिमा येषु गृहेषु तैर्बभासे वज्रनिर्मितानि जालानि गवाक्षाणि तैर्विभूषितैर्गृहैः ६ पद्मादिसं
ज्ञकं संस्थितं संस्थानं येषां तैः ७ वर्धमानगृहैः वर्धमाननामकसंस्थानवद्गृहैः चतुःशालचतुर्द्वारं सर्वतोभद्रसंज्ञितं पश्चि
मद्वाररहितं नंद्यावर्ताख्यं ततः दक्षिणद्वाररहितं वर्धमानं धनप्रदं प्राग्द्वाररहितं स्वस्तिकाख्यं पुत्रप्रदमित्युक्तेर्हि

५

श्री
रा वा
सुं टी
२५

49 वरतां ददर्शेत्यन्वयः ९ विविधाकृतिरूपाणि विविधाआकाराः रूपाणि वर्णाश्च येषां तानि भवनानि ददर्शेति सर्वेणान्वयः त्रिस्था
नस्वरभूषितं उरःकंठशिरोरूपस्थानत्रयजैर्मंद्रमध्यतारस्वरैर्भूषितं १० ॥ सोपाननिनदान् सोपानसंबंधकांतानानककांचीमंजीर।

राघवार्थे चरन्श्रीमान्ददर्श च ननंद च भवनाद्भवनं गच्छन्ददर्श कपिकुंजरः ९ वि
विधाकृतिरूपाणि भवनानि ततस्ततः शुश्राव रुचिरं गीतं त्रिस्थानस्वरभूषितं १०
स्त्रीणां मदनविद्धानां दिवि चाप्सरसामिव शुश्राव कांचीनिनदं नूपुराणां च निःस्वनं ११
सोपाननिनदांश्चापि भवनेषु महात्मनां आस्फोटितनिनादांश्च क्ष्वेडितांश्च ततस्ततः १२
शुश्राव जपतां तत्र मंत्रान्रक्षोगृहेषु वै स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः १३
रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि राजमार्गं समावृत्य स्थितं रक्षोगणं महत् १४

निनदान्यद्वा सोपानेषु पादाघातजशब्दान् आस्फोटितं विलासार्थंकरास्फालनं तज्जन्यातिनदान् क्ष्वेलितान् सिंहनादान् १२
मंत्रान्वेदमंत्रान् स्वाध्याये हृष्टार्थे निरतान् १३ १४

50 मध्यमेगुल्मेमध्यमकस्याप्रदेशे. चरान्ननगरहृतांनवेदकगूढचारान् देद्दितजटिलमुंडाःगूद्दिवनिपतयःगोजिनंगवाजिनंतद्वास
सांवरवाससोविवासाःसः ननुलकायाभरतविउडादिभावनकर्मभूमित्वाभावात्कथंचरंतसांदीद्दित्वमिति वेन्न तिप्रकर्मस्वन
देशेष्वधिकारात् एवणादेस्तयोमहास्यानत्रुकाम्यकर्मसिद्धिरपीत्यन्यत् यथान्वहृरपेइमेवसाममात्रहेरस्तादिशतयपोक्तशेसा
पतेनदेवानामीषद्धिक्रतानपियत्तानूदर्शयतीति वेद्वभाष्यरोत्या चागवैकल्पेप्यनुष्ठितान्कर्मणोद्वयोत्पत्तिरूपकामनासिद्धि

ददर्शमध्यमेगुल्मेराहुमसयवरान्वहून् दीद्दितान्जटिलान्मुंडानोजिनांवरवासिसः ५
रभमदिश्यहरणाननग्निकुंडायुधांस्तथा कृटमङ्गरपाणींश्चदंडायुधधरानपि ६ पकान्ना
नेककर्णाश्चवलदेकपयोधरान् करालान्भ्रूवक्राश्चविकटानवामनांस्तथा ७
धन्विनःखड्गिनश्चैवशतघ्नीमुसलायुधान् पीवरोन्महस्ताश्चविशोचिकवचानलाव ८

स्तथापक्षेदेशानूपंगवैकल्पेपितत्सिद्धिः रत्तसामपिदेवयोतित्वात् ५ अरिष्टनिवारणाद्यर्थकमनुष्ठाननिर्वाहायदर्भमुष्टि
हरणात्वं केषांचित् यथावन्नद्दैःपाणौतथाविप्रकरेकुशाइतिस्मृतेः कृत्याग्नुत्पादनद्वारामारकतयाग्निकुंडानामायुधत्वं
कूटोप्यस्कारकूटःआयुधविशेषः ६ एकपयोधरान् परभागेस्तनसन्निवेशस्तेननापिरहितानविकटान् विषमांगान् ७ ८

श्री
रा वा
सु टी
२९

51 नातिदीर्घातिह्रस्वकानेरेफहकारसंयोगश्रेरेफस्य लघुकार्यकारीतिनु ह्रस्वत्वं १९ छंदोभंगाप्रार्षः २० हृत्तायुधाः वृक्षलगुडादायुधाः
पट्टिशाशनीघ्राघुधविशेषे क्षेपणीर्भिदिपालः २१ यथास्वैरचरान् यथेष्टस्वैरविहारगतान् २२ अव्यग्रं सावधानं आरक्षं आसमंताद्

नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् नातिगौरान्नातिकृष्णान्नातिकुब्जान्नवामनान्
विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ध्वजिनः पताकिनश्चैव ददर्श विविधायुधान् २० शक्ति
वृक्षायुधांश्चैव पट्टिशाशनिधारिणः क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः २१ स्रग्विण
स्त्वनुलिप्तांश्च वराभरणभूषितान् नानावेषसमायुक्तान्यथास्वैरगतान्बहून् २२
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः २३
रक्षोधिपतिनिर्दिष्टं ददर्शांतःपुराग्रतः स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणं २४ राक्ष
सेंद्रस्य विख्यातमद्रिमूर्ध्निप्रतिष्ठितं पुंडरीकावतंसाभिः परिखाभिः समावृतं २५ प्रा-
कारावृतमत्यंतं ददर्श स महाकपिः त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितं २६

तं रक्षकं सैन्यं मध्यमकक्ष्यास्थितं २३ अंतःपुराग्रतः अंतःपुरस्याग्रतः ततः गृहं हाटकमयतोरणं महाहाटकतोरणं प्रकृतप्रसिद्धः कपिः २४
राक्षसेंद्रस्य गृहस्य अन्यमानविशेषणाद्ददर्श पुंडरीकावतंसाभिः श्वेतपद्मभूषिताभिः २५ २६

52 विमानैः पुष्पकादिभिः विचित्रवर्णादिमत्वादद्भुतत्वं दृश्यातां ह्यगजैः ह्यकारैर्गजैः स्वल्पगजैरितिवावत् २७ द्वारमित्यस्यदर्शेति
शेषः २८ प्रविवेशाससाद २९ हेमसप्रवर्णान्स्वर्णानत्सदृशेन जांबूनदेन षोडशवर्णेन निर्मितं चक्रवालप्राकारमंडलं यः

वाजिह्रेषितसंघुष्टं नदितं भूषणैस्तथा रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः २९ वार
णैश्चचतुर्दंतैः श्वेताभ्रनिचयोपमैः भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः रक्षितं सुम
हावीर्यैर्यातुधानैः सहस्रशः राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः सहेमजांबूनदचक्र
वालं महार्हमुक्तामणिभूषितांतं परार्ध्यकालागरुचंदनाढ्यं स रावणांतःपुरमाविवेश ३०
इत्यार्षे रामायणे सुंदरकांडे चतुर्थः सर्गः ४ चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्म
ध्यगतो विराजन् ज्योत्स्नावितानेन वितत्य लोकानुत्तिष्ठनेकसहस्ररश्मिः शंखप्रभं
क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानं ददर्श चंद्रं स कपिप्रवीरः पोप्लूयमानं सरसीव हंसं

स महार्हमुक्तामणिभिर्भूषितोंतः पिरोभागो यस्य परार्ध्याभ्यामुत्तमाभ्यां कालागरुचंदनाभ्यामाढ्यं दीप्यमानं यस्य तदंतःपुरमावि
वेश महनूमान् ३० नगमानः इति श्रीरामायणे सुंदरकांडे चतुर्थसर्गः ४ ग्रंथे श्लोकद्वयं प्रक्षिप्तं १२

श्री वा० रा० सुं० टी० २२

53 ततःश्रंतःपुरप्रवेशानंतरं रात्रेःप्रथमयामस्यसमाप्तकल्पत्वमत्रेतिबोध्यं मध्यंगतंव्योममध्यंचप्राप्तं प्रशुभ्रमंतंशीतांशुंभानुरोनंस्फुर्योगेत
प्रकाशवल्किरणावंतं गोष्ठेशुभ्रमंतमतंहृषोमिव । पापानिपापजनकदुःखानिनाशयंतं लोकाल्हादजनकत्वात्समेधयंतंवर्धयंतं
प्रकाशयंतं श्रभिज्ञोयानंश्रंतःपुरदर्शनसाधनत्वेनत्वमध्यप्राप्तं २ भवितमंदरस्याभातिश्रधिकसन्निधानाभवति पुष्करस्याग्रहीतियोषः

ततःसमध्यंगतमंशुमंतंज्योत्स्नावितानंमहदुद्वमंतं ददर्शधीमान्भुविभानुमंतंगोष्ठेवृषं
मत्तमिवभ्रमंतं । लोकस्यपापानिविनाशयंतंमहोदधिंचापिसमेधयंतं भूतानिसर्वा
णिविराजयंतंददर्शशीतांशुमथाभियांतं २ याभातिलक्ष्मीर्भुविमंदरस्थायथाप्रदोषेषु
चसागरस्था तथैवतोयेषुचपुष्करस्थारराजसाचारुनिशाकरस्था ३ हंसोयथाराजतपंजरस्थः
सिंहोयथामंदरकंदरस्थः वीरोयथागर्वितकुंजरस्थश्चंद्रोपिबभ्राजतथांबरस्थः ४

सेदानींनिशाकरस्यतिपर्यायालंकारःपादचतुष्टयेस्याश्चेकपदयमकंच भविमंदरेप्रदोषेसागरेऽधिकलक्ष्मीसंतिधानंत्रयोषिव
वनादेवाचसेपं ३ हंसेत्यत्रेतिकिंविदाधारप्रतिष्ठितपुष्कलवस्तुत्वमात्रेणावभ्रस्यचंद्रसादृश्यमितिकतकः कुंजरोह्यचस्येतपवंच

ष्टवरमपिनत्विंरोरेवश्वेतामितिबोध्यंश्रवरस्येवर
मध्यस्य ४ ॥

54 परिपूर्णामृगः परिपूर्णाकलंकः स्वरूपहरिणंगस्यसः ज्योत्स्नादविदिस्वरूपकथनमात्रं ५ विनष्टः शीतांशुतुषारस्तुषः शीतलत्वनलविङ्गसंपर्कस्व
पः पंकोयस्यतत्वं च वर्षकालस्याभीतत्वात् वस्तुनीहिमकालेपिविनष्टः शीतनलविङ्गसंपर्कस्वपः पंकोयस्यसयिस्त्वथ हिमालयस्या
निरुद्धत्वादितिभावः महाप्रदस्यसूर्यस्यग्रदेसाकिरणसंक्रमेणवितष्टाविनाशितः पंकस्तमोयेनसः अतएवप्रकाशलक्ष्म्याश्रयेणाहे

शिवः कुंकुमाभिवतीहृणमृगोमहाबलः श्वेतद्वीपार्धमृगः हस्तीवजातवृतदवद्रुमृगे
विभातिचंद्रः परिपूर्णमृगः ५ विनष्टशीतांशुतुषारपंकोमहाग्रहग्राहविनष्टकंपः
प्रकाशलक्ष्म्याश्रयतेमलाकौरराजचंद्रोभगवान्नहुशांकः ६ शिलातलंप्राप्ययथा
हरेंद्रोमहारणंप्राप्ययथागजेंद्रः राज्यसमासाध्ययथानरेंद्रस्तथाप्रकाशोविरराज।
चंद्रः ७ प्रकाशचंद्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः रामाभिरामेवितचित्तदोषः
स्वर्गप्रकाशेभगवान्प्रदोषः ८

ततानिर्मलाकः व्यक्तस्फुरलां छन्नः स्वराजगगनमध्यंप्राप्येतिशेषः ६ शिलातलंगुहा
वह्निस्य ७ प्रकाशयुक्तंचंद्रस्योदयेनऊर्ध्वमागमनेननष्टोनाशितोतमश्छेदपिदोषस्तिमिरंजोयेनतथाभूतः प्रदोषोरजनीमुखयामा
हर्षेननप्रवृद्धरावर्धितारक्षसांपिशिताशनत्वपादोषायेनपिशितभक्षणस्यदोषत्वमविहितजीवहिंसादेत्वत्वात् रामाणाम
भिरामविषयकीरमणविषयकर्इवितोनिरस्तःचित्तदोषःप्रणयकलहस्वपोयेनस्वर्गस्यमखस्यप्रकाशोयतः अतएवभगवा

५

श्री
रा वा
सुं टि
२८

55 सहक्ताः भेदप्रदाविषयाः स्वहृष्टाइतिपाठे स्वस्त्रीयं सहजं पानिवृत्तलक्षणं वृत्तंचारित्रं येषांतास्ताः नक्तंचराउलूकादयोयासुसायां
तथाविहर्तुंप्रवृत्ताः ७ येषुयोद्धृमत्ताः प्रमत्ताःमृत्याद्येदिता येषुतानिमत्तप्रमत्तानिसमाकुलानिरक्षसांगृहाणिरथाश्वेतिसर्वयानोपलक्षणं
भद्रासनंस्वर्णपीठ ८ आक्षिपतिउपरस्परंरंकुर्वंति अधिविक्षिपंतिप्रसारिमित्यर्थः मत्तप्रलापानधिकविक्षिपंतिमुंचंति भ

तत्रीस्वराःकर्णसुखाःप्रवृत्ताःस्वपंतिनार्यःपतिभिःसहक्ताः नक्तंचराश्चापितथाप्रवृत्ता
विहर्तुमत्यद्भुतरौद्रवृत्ताः ७ मत्तप्रमत्तानिसमाकुलानिरथाश्वभद्रासनसंकुलानि वी
रश्रियाचापिसमाकुलानिददर्शधीमान्सकपिःकुलानि ८ परस्परंचाधिकमाक्षिपंति
भुजांश्चपीनानधिविक्षिपंति मत्तप्रलापानधिविक्षिपंतिमत्तानिचान्योन्यमधिक्षिपंति
रक्षांसिवक्षांसिचविक्षिपंतिगात्राणिकांतासुचविक्षिपंति रूपाणिचित्राणिचविक्षि
पंतिदृढानिचापानिचविक्षिपंति ९

त्सुयंतिवा मत्तानिरक्षांसीत्याकर्षः अधिक्षिपंतितिरस्कुर्वंति वक्षांसिविक्षि
पंतिपरस्परंसास्फालयंति गात्राणिहस्तादीनिकांतासुदेहेषोन्यासः चित्राणिरूपाणिनानाविधवेषान्विक्षिपंतिकुर्वंतिकांता
प्रीतयेसंपादयंति धनुषांविक्षेपोविस्फारणं दृढानिरक्षांसिदृढशौर्यत्वेनाभेनानि ९

56 समालभन्त्यः चंदनादीनिति शेषः द्वितीयार्थे श्वसन्तः तत्रासन्नांश्च दृष्टवानिति शेषः ॥३॥ महद्भिः सततं संतो विभीषणादयः रावणपुरमिति शेषः विनिश्वसद्भिः स्वापे तेन योद्धलाभात् ॥४॥ बुद्धिः प्रधानगुणो येषां रुचिरमभिधानं वचनं येषां सम्यक् गृहस्थानानाश्रितिकान् रुचि

ददर्श कांताश्च समालभंत्यस्तथापरास्तत्र पुनः स्वयंभूः सद्रूपवक्राश्च तथा हसंत्यः क्रुद्धाः परास्चापि विनिश्वसंत्यः ॥३॥ महागजेश्चापि तथा नदद्भिः सहस्रजिह्वैश्चापि तथा श्वसद्भिः रणवीरैश्चापि विनिश्वसद्भिर्ददर्श भुजंगैरपि विनिश्वसद्भिः ॥४॥ बुद्धिप्रधानान् रुचिराभिधानान् सद्गृहस्थानानि जगतः प्रधानान् नानाविधानान् रुचिराभिधानान् ददर्श तत्रस्थान् पार्थिवानान् ॥५॥ ननन्द दृष्ट्वा च स तान् सुरूपान् नानागुणानात्मगुणानुरूपान् विद्योतमानान् सुचानान् सुरूपान् ददर्श कांश्चित् पुनर्विरूपान् ॥६॥ ततो वराहान् सुविशुद्धभावांस्तेषां स्वयंस्तत्र महानुभावाः प्रियेषु पानेषु सुसक्तभावा दर्शनारास्च सस्वभावाः ॥७॥ राभिधानान् रुचिरनाम्नः

नानाप्रकारं विधानं वेषादेर्येषां तान् ॥५॥ आत्मगुणान् तद्रुचितं सुवर्णरवतः कांश्चित् पुनर्विरूपान् अपि विद्योतमानान् सुरूपान् निवद दर्शितार्थः ॥६॥ वराहः श्रेष्ठभूषणादियोग्याः उत्तमोत्तमरूपाश्च भावाः कदाचनादयः अनुभावः भावो अन्तःकरणं ताराः तारकाः ॥७॥

श्री रा वा सुं टी २९

57 जलंतीः रूपसंपदान्वलंतीरिव तपालजा प्रमदेन हर्षेणोपगूढाः संवृद्धाः यथा विहंगाः विहंगीरिवेत्यर्थः इंद्रनीलमणि
मयोधगेहेषु नीलतमः सदृशेषु शयनानस्माहर्शः १८ भर्तुः परार्ध्य्कृष्टत्वेनाभिमताः धर्मपराः भर्त्रैकेगालत्ताणयमेनत्पराः
निविष्टाः ऊढाः निवेशाः शिविरोजादिविन्यासेष्विति कोशः मदनउपविष्टायास्तुमदनाश्रयाश्चेत्यर्थः १९ अप्रयाहृताः उपरीयद्रीनाः

स्त्रियोन्वलंतीस्तुयथोपगूढानिशीथकालेरमणोपगूढाः ददर्शकाश्चित्प्रमदोपगूढा
यथाविहंगीविहगोपगूढाः १८ अन्याः पुनर्हर्म्यतलोपविष्टास्तत्रप्रियांकेषुसुखोपविष्टाः
भर्तुः पराधर्मपरानिविष्टाददर्शधीमान्मदनोपविष्टाः १९ अप्रावृताः कांचनराजिवर्णाः कां
श्चित्परार्ध्यास्तपनीयवर्णाः पुनश्चकाश्चिच्छशलक्ष्मवर्णाःकांतप्रहीनारुचिरांगवर्णाः २०
ततः प्रियान्प्राप्यमनोभिरामाः सुप्रीतियुक्ताः सुमनोभिरामा गृहेषुहृष्टाः परमाभिरा
माहरिप्रवीरः सददर्शरामाः २१

कांचनराजिवर्णाः कनकरेखाका
राः परार्ध्याः उत्तमांः तपनीयवर्णाः तप्तस्वर्णवर्णाः
शशलक्ष्माचंद्रः कांतप्रहीनाः प्रियाविप्रयुक्ताः रुचिरांगवर्णाः सुंदरदेहकांतयः प्रथमं ददर्श २० प्रियान्प्राप्यप्रीतियुक्ताः सुमनोभि
रुप्यैरभिरामा अतएव हृष्टाः परयामयायोभयाऽभिरामाः स्वस्वकांतमनोहारा रामान्गृहेषु ददर्श प्रसमीत्सरामाइतिपाठेः प्रि
यान्प्राप्यतान्समीत्सप्रीतियुक्तारामास्तैः प्रियैरम्यमाणाः अतएव गृहेषु हृष्टाः रामा ददर्शेतिशेषः २१

58 वद्दीपादपरकैा वक्रमालाः वक्रसमूहः वक्रप्रेक्षणाः सुपक्ष्माः शोभनवेदमप्रकाशते ३ मालादर्शी शतद्रुदानांमाला रवभूषणानां
मालादर्दर्शवक्राक्षिपक्ष्माशनिपादेक्षिपदूमधिकंवक्रपक्ष्मा शैन्येवोचितंयत्समस्तवक्रत्वमपिकिमित्यपिविलं २२ पार्थिस्थितेस्व
धर्ममार्गस्थेनत्वंवदर्दर्शीनत्वयः साधुजातामितिलताविशेषणंमनसाभिजाता याज्ञामनसास्पृष्टा २३ सनातनेवर्त्मनि प्रविष्टेद

वेदप्रकाशा सुदृढिवक्रमालावक्रासुपक्ष्मा सुहृतेत्रमालाः विभूषणानां बहुदर्शमालाः श
तह्रदानामिववाहमालाः २२ नेत्रेवसीतापरमाभिजाता पार्थिस्थितीराजकुले प्रजाता
लतेवपुष्पुल्लामिवसाधुजातां ददर्शतन्वीमनसाभिजाता २३ सनातनेवर्त्मनिसौमविष्टा
समेतपणीनांमदनाभिविष्टा भवेमनः श्रीमदनप्रविष्टाह्रोभ्यः पराभ्यसूसदाविशिष्टा २४
उत्सादितंसानुसृतान्नकंठप्रावराहेमतमनिष्ककंठी सजातपक्ष्मामभिरम्यकंठीवनेप्र
पन्नामिवनीलकंठी २५ वह्नेपातिव्रत्यमार्गेरामममीहतेध्यायति रामीहणीनां मदनेनरामविषयेणाभिवि
विष्टा यासांश्रीमत्सङ्गतः मनोऽनुप्रविष्टांश्रूनेपरस्परात्ररामोधतित २४ उत्सादितंविरहतापपीडितांश्रुत्नुस्तनासेणाशहेमवा
येतासद्दवर्तमानः कंठोयस्यास्तां प्रश्नरी चाषःकंठ्यामितिवापाठः प्रशरामसंविपथिकाला वराणामत्तमभूषणानामहेमतपवो

मधुरस्वरःकंठोयस्यास्तां नीलकंठी मयूरी २५

ममनिष्कः उत्तमभूषणःकंठेयस्यास्तां प्रभिन्नकंठी

श्री वा रा सुं टी ३.

59 अव्यक्ताप्रभादिनाः स्पष्टरेखाकारा यस्यास्तां प्रदिग्धा लिप्ता क्षतप्ररूढा मुग्नां व्रणरेखा वाणचिह्नं तद्वदामस्येदानीं पीडाजननं नीरावणा
स्येवा २९ चिरस्य चिरस्मिन्समयेऽवधेचिरस्मिन्विषाप्यपश्यन् अचिरस्य संचयः मंद इवान्वेषणाय जडः शक्त इव दुःखोपहतो बभूव अन्तःसर्गे यमकाः

अव्यक्तरेखामिवचंद्रलेखांपांसुप्रदिग्धामिवहेमरेखां क्षतप्ररूढामिवबाणरेखांवायुप्र
भग्नामिवमेघरेखां २९ सीतामपश्यन्मनुजेश्वरस्यरामस्यपत्नींवदतांवरस्य बभूवदुःखो
पहतश्चिरस्यप्लवंगमोमंदइवाचिरस्य ३० इत्यार्षेरामायणेवाल्मीकीयेसुंदरकांडेपंचमः ५
सनिकामंविमानेषुविचरन्कामरूपधृक् विचचारकपिर्लंकांलाघवेनसमन्वितः १
आससादचलक्ष्मीवान्राक्षसेंद्रनिवेशनं प्राकारेणार्कवर्णेनभास्वरेणाभिसंवृतः २
रक्षितंराक्षसैर्भीमैःसिंहैरिवमहद्वनं समीक्षमाणोभवनंचकाशेकपिकुंजरः ३ रूप्य
कोपहितैश्चित्रैस्तोरणैर्हेमभूषणैः विचित्राभिश्चकक्ष्याभिर्द्वारैश्चरुचिरावृतं ४

लंकायाः ३० सास्मानः इतिश्रीरामायणेसुंदरकांडेपंचमःसर्गः ५ विमानेषुसप्तभूमिप्रासादेषुलाघवेनशैघ्र्येणराक्षसेंद्रनिवेशनमाससाद १ २
चकाशेचंद्रमाइवाज्ञाकान्वेषणक्रियावभ्रवैसर्थः ३ रूप्यकंरजतंतेनोपहितैःशोभार्थंलिखितैः ४

३.

60 राजास्थैतैर्गतानूढैः महामात्रैर्हस्तिपकैः उपस्थितं युक्तं प्रसंहार्यैः प्रतिहतवैरैः स्यंदनयायिभिः स्यंदनवाहकैः प्रस्ताश्वैरिमर्थः ५ सिं
हव्याघ्रतनत्राणत्वादिरथविशेषणं दंतादिविकारादांतादयः तत्सूत्रप्रतिमास्ताथरङ्क्षिरितिशेषः घोषवत्वं किंकिणीभिः ६ महता
रथानामावापः स्थानं समं यस्मिन्तन्महारथानां पकोटयासहस्राणि योधयेद्यस्तथन्वितो शास्त्रशास्त्रप्रवीणश्च समहारथ उच्यते

राजास्थैतैर्महामात्रैः शूरैश्च विगतश्रमैः उपस्थितमसंहार्यैर्हयैः स्यंदनयायिभिः ५
सिंहव्याघ्रतनुत्राणैः दांतकांचनराजतैः घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः बहुरत्नसमा
कीर्णं परार्ध्यासनभूषितं महारथसमावापं महारथमहासनं ७ दृश्यैश्च परमोदारैस्तै
लैश्च मृगपक्षिभिः विविधैर्बहुसाहस्रैः परिपूर्णं समंततः ८ विनीतैरंतपालैश्च रक्षोभिश्च
सुरक्षितं मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समंततः ९ मुदितप्रमदारत्नराजवेश्मनिवेशनं व
राभरणसंह्रादैः समुद्रस्वननिस्वनं १० तद्राजगुणसंपन्नं मुख्यैश्च वरचंदनैः महाजनसमा

रत्नकृत्लक्षणमहारथानां महासनं सदावासस्थानं ७ दृश्यैर्दर्शनीयैस्तैलपक्षपरमोदारैः अतिसुंदरैः ८ अंतपालैः पर्यंतरक्षकैः ९ राजवे
श्मनां महापार्श्वादीनां निवेशनानि यस्मिन्तत् भूषणशब्दैः समुद्रस्वनसदृशनिस्वनं १० तद्राजगुणसंपन्नं तैः प्रसिद्धैः राजभवनगुणैः छ

कीर्णं सिंहैरिव महद्गुहं

यचामरादिभिः संपन्नं वरचंदनैश्च संपन्नमित्यन्वयः

श्री
रा वा
सु टी
२१

61 पर्वतस्थत:सोमोयस्मिन्पनार्थेतत्सर्वस्थतंराक्षसै: सदाप्रजितंप्रजितस्वप्रजनीयदेवताकं १२ परिच्छेदोऽलंकार:महात्मनोरा
मरीस्थहेंगाभिकतंशंखघोषविनादितं निर्मार्वितंपर्वस्थतंप्रजितंराक्षसै:सदा १२ समृद्धा
स्त्रिवगंभीरंसमुद्रसमनिस्वनं महात्मनोमहद्वेश्मप्रमहारत्नपरिच्छदं १३ महारत्नसमा
कीर्णंददर्शसमहाकपि: विराजमानंवपुगजाश्वरथसंकुलं १४ लंकाभरणमित्येवसोम
न्यतमहाकपि: चचारहनुमांस्तत्ररावणस्यसमीपत: १५ गृहाद्गृहंराक्षसानामुद्यानानिचस
र्वश: वीक्षमाणोप्यसंत्रस्त: प्रासादांश्चचचारस: १६ अवप्लुत्यमहावेग:प्रहस्तस्यनिवेशनं
ततोन्यत्पुप्लुवेवेश्ममहापार्श्वस्यवीर्यवान् १७ अथमेघप्रतीकाशंकुंभकर्णनिवेशनं विभी
षणस्यचतथापुप्लुवेसमहाकपि: १८ महोदरस्यचतथाविरूपाक्षस्यचैवहि विद्युज्जिह्वस्य
भवनेविद्युन्मालेस्तथैवच वज्रदंष्ट्रस्यचतथापुप्लुवेसमहाकपि: शुकस्यचमहावेग:सा
रणस्यमहद्वेश्मदर्शतत्वय: १९ अमन्यतततद्भावगरणस्यचधीमत: २० वेश्मतिशेषरावणस्यरावणभवणभवनस्यस
समीपनस्तान्याकारप्रवेशोप्य २१ इन्द्राद्गृहं राजवेश्ममहाप्राकारांतर्वर्तिप्रधानरक्षसामेकस्यगृहादपरंगृहमित्यर्थ १६ अस्येवप्र

[illegible]

62 २१ २२ २३ २४ विद्युज्जिह्वद्विजिह्वानामितिबहुवचनमार्षं तथादिस्तथार्थः विद्युज्जिह्वंद्विजिह्वानामितिपाठांतरं २५ २८ उपशायिन्यः

तथेंद्रजितोवेश्मजगामहरियूथपः जंबुमालेःसुमालिश्चजगामहरिसत्तमः २१ रश्मि
केतोश्चभवनंसूर्यशत्रोस्तथैवच वज्रकायस्यचतथाप्लवेसमहाकपिः २२ धूम्राक्षस्याथ
संपातेर्भवनंमारुतात्मजः विद्युद्रूपस्यभीमस्यघनस्यविघनस्यच २३ शुकनाभस्यवक्रस्य
शठस्यकपटस्यच ह्रस्वकर्णस्यदंष्ट्रस्यलोमशस्यचरक्षसः २४ युद्धोन्मत्तस्यमत्तस्यध्वज
ग्रीवस्यसादिनःविद्युज्जिह्वद्विजिह्वानांतथाहस्तिमुखस्यच करालस्यविशालस्यशोणि
ताक्षस्यचैवहि प्लवमानःक्रमेणैवहनूमान्मारुतात्मजः २६ तेषुतेषुमहार्हेषुभवनेषुमहाय
शाः तेषामृद्धिमतामृद्धिंददर्शसमहाकपिः २७ सर्वेषांसमतिक्रम्यभवनानिसमंततः आ
ससादाथलक्ष्मीवान्राक्षसेंद्रनिवेशनं २८ रावणस्योपशायिन्योददर्शहरिसत्तमः विचरन्ह
रिशार्दूलोराक्षसीर्विकृतेक्षणाः २९ शूलमुद्गरहस्ताश्चशक्तितोमरधारिणीः ददर्शविविधान्गु

उपशायोपशायस्तुपर्यायशयनार्थंका पर्यायेशयनस्यानरक्षिकाइत्यर्थस्याङ्गः २५ गुल्मान्राक्षसीसमूहान् ३०

[illegible]

श्री
रा वा
हे टी
३२

63

हरीन्द्रमुख्यान् ३१ पश्यन्नागान्नागान्यगतान्नाम्यान्नेमिमज्जयन्तितान् ३२ मेघस्तनितनिर्घोषत्वादिविशिष्टान्नागान्ददर्श नलम्यः सद
स्ववादिनोऽनेकसेनाः ३४ हेमजालैरविच्छिन्नाः सर्वतोभूषिताः इति शिविकाविशेषणं ३५ शिविकाः ददर्शेत्यनुकर्षः चित्रशालागृ

रावतांश्च महाकायान्नानाप्रहरणोद्यतान् रक्तान्श्वेतान्सितांश्चापि हरींश्चापि महाजवान्
कुलीनान्रूपसंपन्नान्नागान्परगजारुजान् शिक्षितान्गजशिक्षायामैरावतसमान्युधि
निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ३३
मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ३४
हेमजालैरविच्छिन्नास्तरुणादित्यसन्निभाः ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ३५
शिबिका विविधाकाराः स कपिर्मारुतात्मजः लतागृहाणि चित्राणि चित्रशालागृहाणि
च ३६ क्रीडागृहाणि चान्यानि दारुपर्वतकानि च कामस्य गृहकं रम्यं दिवागृहकमेव च ३७
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने समंदरतल· प्रख्यं मयूरस्थानसंकुलं ३८

लतागृहाणि चित्रयुक्तशालावन्ति गृहाणि ३६ दारुनिर्मिताः
क्रीडापर्वताः दारुपर्वतकानि क्लीबत्वमार्षं कामस्य गृहकं रतिगृहं दिवागृहं दिनविहारगृहं सर्वत्रार्थे तत्स्वार्थिकः कन् ३७ म

मयूरस्थानैः क्रीडामयूरस्थानैः संकुलं व्याप्तं ३८

64 निधिजालं निधिजालवदित्यर्थः ३९ धीरनिष्ठितकर्माणां धीरैर्निर्भयस्थिरचित्तैर्निष्ठितं निवर्तितं कर्मणो निधिरत्नादिकर्मणां महर्षादिव
लिङ्गपं यस्मिन् कश्चिन्न कर्मानमिति पठिना धीरैर्निष्ठितस्यानुष्ठितस्य कर्मणस्तयोत्पत्स्यानंतफलरूपमित्यर्थमाह भूतपतेः महेश्वरस्य यद्वे
श्वरस्य वा ३९ ४१ मधासवयोरंतरभेदः नाभ्याकृतक्लेदमार्द्रमित्यर्थः ४२ घोषवद्भिर्मृदंगातिरिक्तैरपि घोषवद्भिर्यावद्भिर्निनादितं ४४

ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमं श्रुतं तत्र निचयं निधिजालं समंततः धीरनिष्ठितकर्माणं
महेंद्रभूतपतेरिव श्रीचीभिश्चापि रत्नानां तेजसा रावणस्य च विरराज च तद्वेश्म रश्मिमानिव रश्मि
भिः ४० जांबूनदमयान्येव शयनान्यासनानि च भाजनानि च शुभ्राणि ददर्श हरियूथप ४१
मध्वासवकृतक्लेदं मणिभाजनसंकुलं मनोरममसंबाधं कुबेरभवनं यथा ४२ नूपुरा
णां च घोषेण कांचीनां निस्वनेन च मृदंगतलनिर्घोषैर्घोषवद्भिर्विनादितं प्रासादसंघात
युतं स्त्रीरत्नशतसंकुलं सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहं ४४ इत्यार्षे सुंदरकांडे षष्ठः
सर्गः ६ स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालं यथा महत्प्रावृषि मेघजालं

भावमानः इत्यार्षे रामायणे सुंदरकांडे षष्ठः सर्गः ६ प्रवरा वराः प्रधानगृहं वर्णयति स विद्युत्पिनद्धं सविहंगजालं १
व्यासक्तानि संबद्धानि वैडूर्यखचितानि सुवर्णजालानि सुवर्णगवाक्षाणि यस्मिन् तत्सविहंगजालमिति गृहमेघयोर्विशेषणं १

65 प्रधानैः प्रशस्तैः शंखादिभिः शालंते शोभंते ननाहृशीः निवेशनानां शालाश्च वानरगृहाणि ददर्श पुनश्च विशालाः चंद्रशाला ददर्श वेश्मा
द्रिषु अत्युन्नतहर्म्यवेश्मसु चंद्रशाला शिरोगृहाणि चंद्रकांतमणिबद्धशालावा २ नसधनं स्वबलेन स्वशाहो रावणवावी ऊवे॰

निवेशनानां विविधाश्च शालाः प्रधानशंखायुधचापशालाः मनोहराश्चापि पुनर्विशाला॰
ददर्श वेश्माद्रिषु चंद्रशालाः २ गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजिता॰
नि सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ३ तानि प्रयत्नाभिसमाहितानि
मयेन साक्षादिव निर्मितानि महीतले सर्वगुणोत्तराणि ददर्श लंकाधिपतेर्गृहाणि ४
ततो ददर्शोच्छ्रितमेघरूपं मनोहरं कांचनचारुरूपं रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं
ह्यप्रतिरूपरूपं महीतले स्वर्गमिव प्रकीर्णं श्रिया ज्वलंतं बहुरत्नकीर्णं नानातरूणां कु
सुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णं ६

रावणेन लंकायाश्च अछिद्रगृहीतत्वात् यद्वा स्वशाहो हनुमद्भावी स्वबलेनार्जितानि लब्धप्रवेशानि ३ प्रयत्नेनाभितः स
माहितानि यथायोग्यं स्थापितानि प्रयत्नाभिसमाहितानि विश्वकर्मकृतान्यपि मायया विचित्ररचनादक्षेण मयेन निर्मितानी
व ४ गृहोत्तमं प्रधानगृहं प्रशस्तं प्रतिरूपरूपं निरूपमरूपं ५ प्रकीर्णं प्रसृतं रत्नकीर्णं रत्नव्याप्तं रजसा पुष्परजसा ६

66 नारीप्रवेकैः नारीश्रेष्ठैः इवाश्चार्यं तडिद्भिरर्च्यमानं पूज्यमानमंभोधरं मेघमिव हंसश्रेष्ठैर्वाह्यमानमह्यमानं विमानमिव ७ ना
नावर्णैर्युक्तोऽपिनयुक्तः कृतोयुक्तीकृतः सचासौचारुमेघश्चतद्वद्विचित्रंविमानंपुष्पकाख्यं ८ यत्रपुष्पकेमहीअनेकजननानाना
धारस्थानंपर्वतराज्यापूर्णापर्वतादयश्चात्रमणिसुवर्णादिनिर्मिताः नत्विदंचित्ररूपमितिभ्रमितव्यं ग्रंनेनवानरसेनायानिर्वायंतत्रा

नारीप्रवेकैरिवदीप्यमानंतडिद्भिरंभोधरमर्च्यमानं हंसप्रवेकैरिववाह्यमानंश्रियायुतं
खेसुकृतंविमानं ७ यथानगाग्रंबहुधातुचित्रंयथानभश्चग्रहचन्द्रचित्रं ददर्शयुक्तीकृ
तचारुमेघचित्रंविमानंबहुरत्नचित्रं ८ महीकृतापर्वतराजिपूर्णाशैलाःकृतावृक्षवि
तानपूर्णाः वृक्षाःकृताःपुष्पवितानपूर्णाःपुष्पंकृतंकेसरपत्रपूर्णं ९ कृतानिवेश्मानि
चपांडुराणितथासुपुष्पाण्यपिपुष्कराणि पुनश्चपद्मानिसकेसराणिवनानिचित्राणि
सरोवराणि १० पुष्पाह्वयंनामविराजमानंरत्नप्रभाभिश्चविघूर्णमानं वेश्मोत्तमाना
मपिचोच्चमानंमहाकपिस्तत्रमहाविमानं ११

वस्थानस्यवक्ष्यमाणत्वात् किंच स्वामीच्छानुसारेणसंकोचविकासौमस्य
वर्त्ततेस्वेच्छयाहनुमद्देववत् वितानंसमूहः एकावलीग्रंथालंकारः ९ कृतानिग्रस्यपत्रेष्वादिशेष १० पुष्पाह्वयंनामसदर्शेत्यन्व
यः वेश्मोत्तमानां देववेश्मभूतविमानानामप्युच्चमानंसौभाग्यपरमकाष्ठां प्राप्तं ११

श्री
रा वा
हे टी
२४

67 कृताश्चेति तत्रविमानेऽइतिशेषः नानावसुभिः रूप्यस्वर्णाद्यैः नानानुरूपाजातितरंगमस्तदृशाः तंगविशेषणं चेतन २ प्रवालजां
हनदकृतानिश्चपाणिपक्षेऽयेषां आवर्जिताः सेत्रविनाजित्सावक्राः पत्रायेषांते स्याद्यान्कामस्यपत्राइवयेषांपत्राभांतितत्र
द्वीपकत्वानादृशाउच्यमानमुणाविहंगास्तत्रकृताः ३ निषुज्यमानाव्याप्रियमाणाः वद्याभाणायालद्वस्याग्रभिषकेऽइतिशेषः

कृताश्चवैदूर्यमयाविहंगारूप्यप्रवालेश्चतथाविहंगाः विचित्राश्च नानावसुभिर्भुजंगा
जात्यानुरूपास्तुरगाःशुभांगाः २ प्रवालजांबूनदपुष्पपत्राःसलीलमावर्जितजि
ह्मपत्राः कामस्यपत्राइवभातिपत्ताःकृताविगाःसमरावाःसपत्राः ३ विषुज्यमा
नाश्चगजाःसहस्ताःसकेसराश्चोत्पलपत्रहस्ताः बभूवदेवीचकृतासुहस्तालक्ष्मी
स्तथापद्मिनिपद्महस्ता ४ इतीवतत्स्दृहमभिगम्यशोभनंसविस्मयोनगमिवचारु
कंदरं पुनश्चतत्परमसुगंधिसुंदरंहिमात्ययेनगमिवचारुकंदरं ५

हस्ताःशुंडाः पद्मकरविहारिगजाकारनिर्माणात् सकेसरत्वमुत्पलपत्रहस्तत्वं वतेषांतादृग्गजास्तत्रकृत्वाबभूवुरितिशेषः
पद्मिनिपद्मवन्तरसि ४ इतीवएवंप्रकारचारुकंदरंचारुगुहंनगमिपर्वतमिवचारुदर्शनंतत् गृहमभिगम्यसविस्मयोभूदितिशे
षः हिमात्ययेवसंतेपरमसुगंधिचारुकंदरंनगमिवहृद्यमिव कंदरीत्रकोदरःअनश्चाभिगम्यसविस्मयोभूदितिशेषः परि

२ [illegible]

68 अभिपत्याभिपत्य चरन्संचरन् पतिगुणवेगनिर्जितां पतिसम्बन्धवेगेन पतिगुणनिरंतरध्यानेन निर्जितां निर्जितदुःखां अहृष्यमहृष्टां दुः
खितेत्यभूदिति शेषः आर्षोऽयं ९ बहुविधभावितात्मनः नानाप्रकारेण सर्वजगत्सर्जितस्वभावस्य स्वभाववाची आत्मशब्दः कृतात्म-
नः शिक्षितान्तः करणस्य सुवर्त्मनः शोभनतीतिमार्गवर्तिनः सचक्षुषः ज्ञातिस्रुतिन्यायरूपचक्षुःसहितः ८ संक्रमानः इत्यार्षं

ततः स तां कपिरभिपत्य पूजितां चरन्पुरीं दशमुखबाहुनिर्जितां अदृश्यतां जनकसुतां ।
सुपूजितां सुदुःखितां पतिगुणवेगनिर्जितां ९ ततस्तदा बहुविधभावितात्मनः कृतात्म
नो जनकसुतां सुवर्त्मनः अपश्यतोभवदतिदुःखितं मनः सचक्षुषः प्रविचरतो महात्मनः ८
इत्यार्षे रामायणे सुंदरकांडे सप्तमः सर्गः ७ स तस्य मध्ये भवनस्य संस्थितो महद्विमानं मणि
रत्नचित्रितं प्रतप्तजांबूनदजालकृत्रिमं ददर्श धीमान्पवनात्मजः कपिः १

श्रीरामायणे सुंदरकांडे सप्तमः सर्गः ७ अथ विशिष्टकं वर्णयितुमाह स इति मणिरत्नैर्मणिश्रेष्ठैश्चित्रितं प्रतप्तजांबूनदजालानां त
स्य गवाक्षाणां कृत्रिमं कृतिर्यस्मिन् तत्तस्य भवनस्य रावणगृहस्य मध्ये महद्विमानं पुष्पकं ददर्श १

श्री 69 अप्रमेयप्रतिकारकृत्रिमं अप्रमेयैरपरिच्छेद्यैः सौंदर्यादिभिः प्रतिकारैः प्रतिमादिभिः कृत्रिमं तिकृत्तविचित्रशोभं पाठेन रत्नसमुदाय कि
रा वा मिति कल्पकः विश्वकर्मणा वा स्वयं साधितिकृतं मया निर्मितं भद्रमिति साधित्यनुमोदितमित्यर्थः दिवमाकाशं गते वायुपथे प्रतिष्ठितं वा
म टी. युपथस्यैवादित्यपथत्वात्तस्य चिह्नभूतं २ न तत्र तादृशं किंचिद्यत्प्रयत्नतो नाकृतं अपितु सर्वं प्रयत्नकृतमेवेत्यर्थः यवद्यवना
३५ न महार्हरत्नवत्तद्वन्मूल्यरत्नवत्तादृशं किंचिदपि तत्र न ये विशेषा रचनाविशेषास्तत्र नियताः प्रतिष्ठितास्ते सुरेष्वपि सुरविमाने

तदप्रमेयप्रतिकारकृत्रिमं कृतं स्वयं साधिति विश्वकर्मणा दिवंगते वायुपथे प्रतिष्ठितं
व्यराजतादित्यपथस्य लक्ष्मवत् २ न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्ह
रत्नवत् न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ३ तपःसमा
धानपराक्रमार्जितं मनःसमाधानविचारचारिणम् अनेकसंस्थानविशेषनिर्मितं ततस्
ततस्तुल्यविशेषनिर्मितं ४

ष्वपि न महाविशेषगुणाधिक्यं ३ तपसा उपवासादिना समाधानेन भगवन्निचितसमाधानेन लब्धो यः पराक्रमस्तेन
रावणार्जितं मनःसमाधानेन यत्र विचारो गमनं स तत्र संचरणशीलं मनःसंकल्पितदेशगमनशीलं संस्थानविशेषास्त
न्नाविशेषाः ततस्ततस्तस्माद्यास्तेन तुल्येन दिव्यविमाननिर्माणोचितेन विशेषेण विशिष्टपदार्थेन निर्मितम् ४५ ३५

70 मनःसमाधाय स्वामिमनोनुरुध्य तुशीघ्रगामित्वादिधर्मकं दुरासदंपापिभिरितिशेषः दुरावरमितिपाठे शत्रुभिर्दुर्निवारमित्यर्थः महर्धिना
दीवांभावयाच्छादसः एवंतुल्यगामिनमित्यत्र पुष्पकंतु विमानशब्दोऽर्थवादिदिवी अग्र्यंदेमहात्मनांपुण्यकृतामेवालयंद्यासदं ५ वशहप
एवार्थेयत्नस्यावेनवत्वेपितदभिमानिदेवतायाश्चितत्वादिवोध्यं ५ शेषंगानिविशेषमानेव्यविशेषेभ्योमलत्तणादेशविशेषेसंस्थि
तं विचित्राणामाश्चर्यवस्तूनांकूटंसमवायभूतं बहुभिःकूटैःशालाभिर्मंडितंगिरेर्विचित्रावांतरशृंगवच्छिखरमिव ६ उह्यमान
मनःसमाधायतुशीघ्रगामिनंदुरासदंमारुततुल्यगामिनं महात्मनांपुण्यकृतांमहर्धिनांय
शस्विनामग्र्यमुदामिवालयं ५ विशेषमालंब्यविशेषसंस्थितंविचित्रकूटंबहुकूटंबहुकूट
मंडितं मनोभिरामंशरदिंदुनिर्मलंविचित्रकूटंशिखरंगिरेर्यथा वहंतियंकुंडलशोभिता।
नामहाशनाव्योमचरानिशाचराः विवृत्तविध्वस्तविशाललोचनामहाजवाभूतगणाःसह
स्रशः ७ वसंतपुष्पोत्करचारुदर्शनंवसंतमासादपिचारुदर्शनं सपुष्पकंतत्रविमानमुत्तमंदद
र्शतद्वानरवीरसत्तमः ८ इत्यार्षेरामायणेसुंदरकांडेऽष्टमःसर्गः ८
विशेषणभूतगणायइह तितद्विमानंतत्रददर्शेत्यन्वयः विवृत्तानिविवृतानिविध्वस्तानित्यक्तनिमेषाणिविशालानिलोचनानि
येषां निशाचराःनिशास्वप्यहरहविशेषंचरंतिते ७ वसंतपुष्पोत्करचारुददर्शनं वसंतकालिकपुष्पसमूहेनचारुदर्शनं ८ उह्य
मानः इत्यार्षेरामायणेसुंदरकांडेऽष्टमःसर्गः ८

श्री रा वा सुं टी ३९

तस्येति प्रालघ्यवरिष्ठस्य लंकामध्यवर्तिनो महत्समूहवतो महागृहस्य १ अर्धयोजनविस्तीर्णं तिर्यक्प्रमाणं २३ आवासं बहुरावणसमा
धारणं वा सस्थाने राक्षसेंद्रनिवेशनं तन्मात्रवाक्यानं ४ परिक्षिप्तमंडुके रेहशागजादिसत्वैर्विग्रसंबाधत्वेनातिविस्तृतत्वं सूच्यते ५ राक्ष

स्य

तस्यालघवरिष्ठमध्येविमलमायतं ददर्शभवनश्रेष्ठंहनूमान्मारुतात्मजः १ अर्धयोजनवि
स्तीर्णमायतंयोजनंमहत् भवनंराक्षसेंद्रस्यबहुप्रासादसंकुलं २ मार्गमाणस्तुवैदेहींसीता
मायतलोचनां सर्वतःपरिचक्रामहनूमानरिसूदनः ३ उत्तमंराक्षसावासंहनुमानवलोक
यन् आससादाथलक्ष्मीवान्राक्षसेंद्रनिवेशनं चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैवच
परिक्षिप्तमसंबाधंरक्ष्यमाणमुदायुधैः ५ राक्षसीभिश्चपत्नीभीरावणस्यनिवेशनं आहृता
भिश्चविक्रम्यराजकन्याभिरावृतं तन्नक्रमकराकीर्णंतिमिंगिलझषाकुलं वायुवेगसमाधू
तंपन्नगैरिवसागरं ७ याहिवैश्रवणेलक्ष्मीर्याचेंद्रेहरिवाहने सारावणगृहेरम्यानित्यमेवा
नपायिनी याचराज्ञःकुबेरस्ययमस्यवरुणस्य [illegible] स्य वा

२

सीभिः राक्षसजातिजाभिःपत्नीभिराहृतं तथाविक्रम्याहृताभीराजकन्याभिश्चा
वृतं ६ पन्नगैर्धुतंसागरमिवतत्पश्यतिस्म ७ लक्ष्मीःशोभारावणगृहेलंकायां ८ ऋद्धिःऐश्वर्यंनहिशिष्टाजनमीष्वधिका ९

३९

72 तस्मादेतस्यमध्यंयोजनविस्तीर्णत्वादिधर्मगुणः वेश्मसस्त्रीकशायनगृहमितिकतकः वेश्मपुष्पकाख्यमितितीर्थः पुनस्तीर्थव्याख्यास्या
पसौनिर्यूहोमत्तवारणः ९ पुनर्हेमदारोहणेशोभनयापुष्पकंवर्णयति ब्रह्मणार्थेइतिभगवतोलीलाफलकमित्यर्थः ॥ १२
कान्तेस्वर्गेहरणेस्वर्णजातिविशेषाद्भूमस्वर्णाइतिकश्चित् ईहामृगोवृकस्तेस्यास्तिमाधुर्के: १२ कूटागारैःगृभस्वर्गदैःशुभागारै

तस्माद्दस्यास्यमध्यस्थंवेश्मवास्याख्यनिर्मितं वहूनिर्यूहसंयुक्तंमदपवनात्मजः ९ ब्रह्म
णार्थेकृतंदिव्यंदिवियद्विश्वकर्मणा विमानंपुष्पकंनामसर्वरत्नविभूषितं परेणतपसालेभे
येत्कुवेरःपितामहात् कुवेरमोजसाजित्वालेभेतद्राक्षसेश्वरः १२ ईहामृगःसमायुक्तंहिरि
वंयोवरं कूटागारैःशुभागारैःसर्वतःसमलंकृतं ज्वलनार्कप्रतीकाशैःसुकृतंविश्वकर्मणा
हेमसोपानयुक्तंचचारुप्रवरवेदिकं जालवातायनैर्युक्तंकाचनैःस्फाटिकैरपि इन्द्रनील
महानीलमणिप्रवरवेदिकं १६ विद्रुमेणविचित्रेणमणिभिश्चमहाधनैः निस्तुलाभिश्चमु

विहारयोग्यगृहैः १५ वार्यः संदराःप्रवराःश्रेष्ठाःवेदिकायस्मिंस्तत् १५ जालवातायनयोः कांचनकान्तेस्वर्णमंधासवयोग्यकंचि
त्रेदर्पणिकल्पानिर्वाहःएवमिंद्रनीलमहानीलयोरपि १८ निस्तुलाभिःवर्तुलाभिःनिरुपमाभिर्वातलेनकुट्टिमप्रदेशेन १९ ॥
॥ ॥ ॥ ॥ ॥ ॥

श्री
रा वा
सुटी
३८

73 आदित्यतरुणोपमं तरुणादित्यसदृशं १८ तत्रस्थः पुष्पकविमानस्थः १९ संमूर्छितं व्याप्तं गंधवहमनिलमधितद्धेतनरूपवंतमिव गंधद्र
व्यस्य रूपमिव तन्हाष्य संबंधात्मगंधः स्वयं महासत्वं उत्तमं बंधुर्बंधुमिव जिघ्रेन भूत गंधापरोक्षात हृदवाधुरप्यपरोक्षत्वाभूत २०
यत्र स रावणस्तत्रस्थानेइतएहीत्युवाचेव उक्तगुणो वायुः कर्त्रीदिव्यगंधेन रावणशयनगृहे ज्ञातवानित्यर्थः ततस्तस्मात्पुष्पा
कस्य कर्तृगंधानुमितां रावणशयनशालां प्रस्थितस्तां शालां ददर्श यत्र पुष्पकस्यैव मध्यशालान्तरस्य तदंतरमिमध्येरनतचित्रे

चंदनेन च वर्णेन तपनीयनिभेन च सुपुण्यगंधिना युक्तमादित्यतरुणोपमं १८ विमानं पु
ष्पकं दिव्यमारुरोह महाकपिः तत्रस्थः सर्वतो गंधं पानभक्ष्यान्नसंभवं १९ दिव्यं संमूर्छि
तं जिघ्रन् रूपवंतमिवानिलं स गंधस्तं महासत्वं बंधुर्बंधुमिवोत्तमं २० इत एहीत्युवाचेव
तत्र यत्र स रावणः ततस्तां प्रस्थितः शालां ददर्श महतीं शिवां २१

प्रस्थितइतिपदस्वारस्यात् अर्थयोजनविस्तीर्णमित्यादिना महालयप्रदर्शनोपक्रमाच्च महालयं दृष्ट्वा तद्विमध्ये पुष्पकमवि
ष्यन्नस्यापव रावणशयनगृहं तदगृहं व संभ्रमाय पुष्पकादवरुह्य तं प्रति प्रस्थितस्तां ददर्शेत्येवव्याख्येमिति कतकः यद्धत्यादि
नोक्तव्याख्यैव युक्तेति मम भाति अवनीयविमानाच्च हनुमान्मारुतात्मजः इत्यस्य उपसंहारात् २१

३८

74 महाकांतां द्युतिरमणीयामित्यर्थः शालाविशेषणं कांताकमनीयां नारीं लामेव विशिनष्टि मणीत्यादिना श्लिष्टः संजीवतीमिवेर्त्य
तेन मणिकृतसोपानानि विशेषेणाकृतानि यस्यां २२ तलं कुट्टिमभूः दंतांतरितरूपिकामिति दंतै रंतरितानि मध्ये मध्ये निर्मितानि रूपा
णि यस्यां सा चामीकरैरपि अंतरितरूपिकामित्यन्वकर्ष २३ बहुभिः स्तंभैरुपेतां स्तंभान्वादः बहुतं च विपुलत्वं समंतात् सुविभूषि

रावणस्य महाकांतां कांतामिव वरस्त्रियं मणिसोपानविकृतां हेममालविराजितां २२
स्फाटिकैरावृततलां दंतांतरितरूपिकां मुक्तावज्रप्रवालैश्च रूप्यचामीकरैरपि २३
विभूषितां मणिस्तंभैः सुबहुस्तंभभूषितां समैरृजुभिरत्युच्चैः समंतात्सुविभूषितैः २४
स्तंभैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव महत्या कुथयास्तीर्णां पृथिवीलक्षणांकया २५
पृथिवीमिव विस्तीर्णां सराष्ट्रगृहशालिनीं नादितां मत्तविहगैर्दिव्यगंधाधिवासितां २६
परार्ध्यास्तरणोपेतां रक्षोधिपनिषेवितां धूम्रामगरुधूपेन विमलां हंसपांडुरां २७

तैः रत्नादिभिरिति शेषः २४ अत्युच्चैः पक्षैरिवात्युच्चैः स्तंभैर्दिवं संप्रस्थितामिवोत्प्रेक्षा अत्र कुथयादिशालविचित्रकंबलास्तरणेन पृ
थिवीलक्षणं वनरत्नं २५ सराष्ट्रगृहशालिनीमिति पृथिवीविशेषणं २६ हंसायां शुभ्रां सवत् पांडुरां २७

श्री वा रा स टी. ३८

75 कल्माषीशिवलवर्णा वसिष्ठगोः अनेन सर्वानंददायित्वं विहितम् मध्यमत्वं च सर्वमनोरथपूरकत्वं च सत्याने वर्णस्य देहकांतेः
प्रसादिनी संपादिका २८ तोशालां दृदर्शेति पूर्वेणा संबंधः पंचभिरिंद्रियार्थैः शब्दस्पर्शरूपरसगंधैः पंचेंद्रियाणि श्रोत्रत्वकचक्षूरसनघ्रा
णानि २९ तर्पयामास हनूमत इति शेषः रावणपालिनाशालेति शेषः स्वर्गः ज्योतिष्टोमादिफलभोगभूमिः देवलोको वायुवरुणादि

पद्मपुष्पोपहारेण कल्माषीमिव सुप्रभां मनसो मोदजननीं वर्णस्यापि प्रसादिनीं तां शोकनाशनीं दिव्यां श्रियः संजननीमिव इंद्रियाणींद्रियार्थैस्तु पंच पंचभिरुत्तमैः २९ तर्पयामास मातेव तदा रावणपालिता स्वर्गोयं देवलोकोयमिंद्रस्यापि पुरी भवेत् ३० सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः प्रध्यायत इवापश्यत्प्रदीपांस्तत्र कांचनान् धूर्तानिव महाधूर्तैर्देवनेन पराजितान् ३१ दीपानां च प्रकाशेन तेजसा रावणस्य च अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ३२

लोकः इंद्रस्य पुरी अमरावती ३० परा गांधर्वसिद्धिः तन्मायेत्यर्थः ३१ प्रध्यायतो ध्यानविष्टान् धूर्तो दिदेवनः न जानिसमर्थो महाधू
र्तैः महाधूर्तेन देवनेन पराजितोदिहधूर्तः धनानाशात् ध्यायन्निवास्ते कांचनान्दीपान्कांचनदीपस्तंभस्य दीपान् विद्युल्लदीपा
ग्रे च दृष्टवान् इत्यर्थः ... प्रभास्वरा रावणतेजोभिभूतानि न यथापदिति अर्थः ३२ प्रदीमाग्रग्निज्वालाज्वलितानाग्रनेनाग्निमाग्निदाहःसूचितः ३३ ३८

76 कुथासीनं आसीनं कुथायां आयानं ३४ बलवत्प्रसुप्तमपश्यदिल्यन्वयः ३५ तत्प्रसुप्तं प्रसुप्तजनं रावणागारं निःशब्दान्तरं निर्गतस्वा
स्वशब्दैर्नूपुरसिंजितादिभिर्भूषितं ३६ निद्रावशात्संवृतानि संवृतपत्राणि आह्वानि च तानि दंतानि तानि मीलिताक्षीणि
प्रतिसंवृतपत्राणि स्वर्गदेवलोकादेरिव संवृतमीलितयोरपि भेदो बोध्यः यद्वा संवृतदंतानीत्यस्यैव व्याख्यानं मीलिताक्षीणि

ततोपश्यत्कुथासीनं नानावर्णांबरस्रजं सहस्रं वरनारीणां नानावेषविभूषितं ३४ प
रिवृतं धरातलगतं निद्रावशगतं क्रीडितोपरतं रात्रौ प्रसुप्तं बलवत्तदा ३५ तत्प्रसुप्तं
विरुरुचे निःशब्दान्तरभूषितं निशाहंसमनेयथापद्मवनं महत् ३६ तासां संवृत्तदं
तानि मीलिताक्षीणि मारुतिः अपश्यत्पद्मगंधीनि वदनानि सुयोषितां ३७ प्रबुद्धानीव पद्मा
नि तासां भूत्वा क्षपाक्षये पुनः संवृतपत्राणि रात्राविव बभुस्तदा ३८ इमानि मुखपद्मा
नि नियतं मत्तषट्पदाः अंबुजानीव फुल्लानि प्रार्थयंति पुनः पुनः ३९ इति वा मन्यत श्रीमा
नुपपत्त्या महाकपिः मेने हि गुणतस्तानि समानि सलिलोद्भवैः ४०

ति यद्वा संवृतत्वमोष्ठयोः ३७ क्षपाक्षये पद्मानीव प्रबुद्धानि भूत्वा पुनः रात्रौ संवृतपत्राणि पद्मानीव बभुरित्यन्वयः ३८ मुखानि ह
शात्हनुमतो जातां संभावनामाह इमानीति फुल्लानि प्रार्थयंतीत्यन्वयः नियतं निश्चितं ३९ उपपत्त्या युक्त्या ४० सलिलोद्भवैः पद्मैः ४०

श्री
वा रा.
सु टी.
३९

॥ ५१ ॥ ५२ ॥ शुण्ठशोषसमावृतास्तद्युक्ताः संगता एकदेशमिलिताः अनेन सौंदर्यातिशयोक्तिरूपोत्प्रेक्षालंकारः ५३ ते देवा इव नागानामिवेति प्रभा
देहकान्तिः वर्णो रूपं प्रसादः स्वच्छत्वं उज्वलत्वं ५४ आवृताः कवचाः पीनस्रजश्च यासां ताः अप्रकीर्णानि रत्नस्तनः अथानि वरभूषणानि यासां ताः

तानस्पृशन्नुभेशावाताभिः स्त्रीभिर्विराजिताः शारदीव प्रसन्नाद्यौस्ताराभिरभिशोभिता ५१
स चताभिः परिवृतः शुशुभे राक्षसाधिपः यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ५२ या
श्च्यवंते वराताराः शुण्ठशोषसमाहृताः इमास्ताः संगताः कृत्स्ना इति मेने हरिस्तदा ५३ ता
राणामिव सुव्यक्तं महतीनां शुभार्चिषां प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषितां ५४
व्यावृत्तकचपीनस्रक् प्रकीर्णवरभूषणाः पानव्यायामकालेषु निद्रोपहतचेतसः ५५
व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः पार्श्वे गलितहाराश्च काश्चित्परमयोषितः
५६

पानव्यायामकालेषु पानानन्तरकालिकगानन्दत्यरत्यादिक्रीडाकालेषु उक्तगुणाश्च तप एव श्रमाविद्रोपहतचेतसः ५५ उक्तं
भूषणप्रकिरणमेव प्रपंचयति व्यावृत्तेति उद्भ्रान्ताः स्वस्थानात्स्खलिता नूपुरा यासां ताः पार्श्वे एकस्मिन् गलिता विस्रस्ता हारा

श्रीकामिनि [illegible] ३९

78 मुक्ताहारैर्वृताः छिन्नमुक्ताहाराः आविद्धं विद्धिं भेदं रशनादाम कांचीगुणो यासां ताः एवं भूषणानां धराः स्त्रियस्तेन शयने उपमा वादिताः किशोर्य
इव कृतभारवाहनाः श्रांताः किशोर्यो वडवा यथा प्रथमं समापनपनायल्लदनेनमसक्तपल्ययनवंधाः शेरते न तद्वत् ४७ प्रकुंडलधराः कुंडलरहित
रणरहिताः गलितकुंडला इति यावत् विच्छिन्नाम्रदिताश्च स्रजो यासां ताः अत्र रेजुरित्यनुकर्षः ४८ अंशवः प्रभाः किरणास्तदाधाराः अंश
वः सूत्रसमशमयः किरणाः स्वलरमयश्छन्ये उद्गताः वैपरीत्येन स्थिताः हारा मुक्ताहाराः ४९ वैदूर्या वैदूर्यमणिमालाः कादंबाः कलहंसाः

मुक्ताहारवृताश्चान्याः काश्चित्स्रस्तवाससः आविद्धरशनादामाः किशोर्य इव वादिता
प्रकुंडलधराश्चान्या विच्छिन्नाम्रदितस्रजः गजेंद्रमृदिताः फुल्ला लता इव महावने ४८ चंद्रां-
शुकिरणाभाश्च हाराः कासांचिदुद्गताः हंसा इव बभुः सुप्ताः स्तनमध्येषु योषितां ४९ अ-
परासां च वैदूर्याः कादंबा इव पक्षिणः हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ५०
हंसकारंडवोपेताश्चक्रवाकोपशोभिताः आपगा इव ता रेजुर्जघनैः पुलिनैरिव ५१

अत्र कादंबशब्देन कारंडवपदवाच्यो जलकाक उच्यते अन्यथा वैदूर्योपमानत्वमसंगतं स्यात् हेमसूत्राणि च अत्रापि स्तनमध्येऽ
तानेत्यनुकर्षः चक्रवाकानां पीतत्वसादृश्यादुपमानत्वं ५० स्त्रीरूपनाम्ना वर्णभूषणानि हंसादिस्थानीयानि कटीप्रदेशो भागो जघनं ५१

श्री
रा बा
सुं टी
४०

79 किंकिणीजालसंकाशाः तद्वत्मुकुलितनयनाः तत्स्थानेचनद्यां मुकुलितकमलदानि हेमविभूलांबुजत्वेन वक्रनिगरणां उपमानेव
ननिगरणं किंकिणीजालसंवाधा इतिपाठे किंकिणीजालसंवाधत्वमुभयत्रापिस्पष्टमेव शाद्वलत्वसाधर्म्यात् किंकिणीशद्
नलदलीणामपूर्केः भावविलासापवस्वामिकस्तरनभावोवाग्राह्योयासांताः यशोऽतिगुणावत्वहृतनयशपवंतीरयासांताः ये

किंकिणीजालसंकाशास्तप्तहेमविभूलांबुजाः भावग्राह्यायशस्तीराः सुप्तानद्यइवाबभुः
सरजूंषिगोष्ठकासांचिकृचाग्रेषुवसंस्थिताः वभ्रुभूषणानीवशुभाभूषणराजयः
अंशुकातांशुकासांचिन्मुखमारुतकंपिताः उपर्युपरिवक्त्राणांव्याधूयंतेपुनःपुनः ५४
नाः पताकाइवोद्भूताः पत्नीनांरुचिरप्रभाः नानावर्णसुवर्णानांवक्त्रमूलेषु ५५

शः शाद्वेनलक्षणयाकांतिरितिसे सुप्तानार्यौनद्यइवाबभुः ५२ भूषणराजयः स्विमर्दजनितरेखाः भूषणराशयइतिपाठेप्ययमे
वार्थोलक्षणादिनाबोध्यः ५३ वक्त्राणामुपर्युपरीत्यन्वयः ५४ व्याधूयमानमपिकांतमुत्येत्ततेनाइति विधेयमयेत्तसीलिं
गतिदेशः पत्नीनां शार्थाद्रावणस्यअनेकवर्णावतसुवर्णनंतनिर्मितवाससांपताकाइवेत्यन्वयः ५५

४०

80 शुभार्चिषां कासांचिद्योषितां कुंडलानि मुखमारुतसंकंपैः मुखमारुतसंसर्गात्कृतवल्गनैर्मंदंमंदं ववल्गुः तत कुंडलानामतिलघु
तानेन तासां सौकुमार्यातिशयो व्यंग्यः शार्करासवविशेषस्तद्योगात्तद्गंधः प्रकृत्या च सुरभिः तत एव सुखस्तासां वदननिश्वासो राव
णं सिषेवे यद्वा प्रकृत्याऽसुरभिरपि वायुरिति शेषः तासां वदननिश्वासस्तु सुकृतयुगसंग्राह्य जंतं अत एव शार्करासवगंधो रावणं सिषेवे ५७

ववल्गुः स्वात्रकासांचित्कुंडलानि शुभार्चिषां मुखमारुतसंकंपैर्मंदंमंदं च योषितां शार्क
रासवगंधः सप्रकृत्या सुरभिः सुखः तासां वदननिश्वासः सिषेवे रावणं तदा ५७ रावणानन
शंकाश्च काश्चिद्रावणयोषितः मुखानि च सपत्नीनामुपाजिघ्रन् पुनः पुनः अत्यर्थं सक्तमनसो
रावणे ता वरस्त्रियः अस्वतंत्राः सपत्नीनां प्रियमेवाचरंस्तदा ५९

रावणाननशंकाः मदनिद्रोभयजविवेकलोपात् सपत्नीनां च सपत्नीनामपि मुखानि उपाजिघ्रन् ५८
नत्तु सपत्नीभिः कृतं मुखाघ्राणं ताः कथं सेहिरे तत्राह अत्यर्थमिति अत्यासक्तेरेवास्वतंत्राः मदपारवश्यान्नत्याभूताः वरस्त्रि
यः सपत्नीभिराघ्रातमुखा अपि सपत्नीनां प्रियमेवाचरन् नाप्रियं तासां मुखानि रावणमुखशंकयोपाजिघ्रन्निति भावः ५९

श्री
हा वा
स टी
४१

81 परिहार्यो वलयः उपनिधाय उपधानं कृत्वा अंसकानिव उपनिधायेत्यनुकर्षः ९० अन्येत्यादि श्लोकद्वये शिश्यिर इति पदं यथायोगं वच
वनविपरिणामेन योज्यं उपनिधायेति पदं च ९१ स्नेहोत्र सवर्णीयः ९२ एकीकृतभुजाः परस्परसंबद्धभुजाः ९३ अतएवाह अन्योन्येति
माला पुष्पमाला उपमेये मत्तषट्पदस्थानीयाः कचभारा नेत्रद्वंद्वानि च ९४ लतानानावनमिवेत्यन्वयः अन्योन्यसंबंधे माला

बाहू उपनिधायान्याः पारिहार्यविभूषिताः अंसकानिव रम्याणि प्रमदास्तत्र शिश्यिरे ९०
अन्याश्च ललितं वानस्यास्तस्याः काचित्पुनर्भुजं अपरा त्वंकमन्यस्यास्तस्याश्चाप्यपरा ऊरुवै ९१
ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः परस्परनिविष्टांगयो मदस्नेहवशानुगाः ९२
अन्योन्यस्यांगसंस्पर्शात्प्रीयमाणाः सुमध्यमाः एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ९३
अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ९४
लतानां माधवे मासि फुल्लानां वायुसेवनात् अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयं ९५
प्रतिवेष्टितसुस्कंधमन्योन्यभ्रमराकुलं आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत् ९६

कारेण ग्रथितमिव प्रतिवेष्टिताः सुस्कंधाः नायकानां च शोभनाः स्कंधा येन तत् अन्योन्यं यथा वंतो ये भ्रमरास्तैराकुलं स्त्रीणामपि प
ग्निनीत्वात् भ्रमराकुलत्वं केशपाशनेत्रादयो वा तास्तु भ्रमराः स्त्रीवनं स्त्रीसमूहः ९६

४१

82 नासांयोषितामुचितेषुस्थानेषुसम्यक्प्रतिष्ठितानामपिभूषणांगांबरस्रजांविवेकमाधातुंकर्तुंनशक्यं अपरिमितत्वात्भूषणाम्
ष्वयोरेकत्रध्यानपरस्परसंग्रथितत्वेनसुभ्रमत्वाच्च इमानिअस्याभूषणानिइमान्यन्यस्याइतिविवेकःकर्तुमशक्यइतिभ्रांतिमान
लंकारोऽयं ८७ स्वस्वसंविष्टेस्वस्वसद्मसुकांचनाः कांचनस्तंभगाःदीपाः दीपस्थाः स्त्रियःकर्तारःस्त्रियःकर्म अनेनरावणोजाय

उचितेष्वपिसुव्यक्तंनतासांयोषितांतदा विवेकशक्यमाधातुंभूषणांगांबरस्रजां ८७ रावणे
स्वस्वसंविष्टेनास्त्रियोविविधप्रभाः ज्वलंतःकांचनादीपाःप्रेक्षंतेनिर्निमेषाइव ८८ राजर्षिवि
प्रदैत्यानांगंधर्वाणांचयोषितां रक्षसांचाभवन्कन्यास्तस्यकामवशंगताः युद्धकामेनताः
सर्वारावणेनहृतास्त्रियः समदामदनेनैवमोहिताकाश्चिदागताः ८९

निर्निमेषासम्यक्तद्दर्शनेभयंसूचितं ८८ राजर्षयोविप्रादैत्याश्च अस्यब्रह्मराक्षसत्वात्अस्तिविप्रकन्याविवाहेऽधिकारःकामवशंगताःसं
तस्तस्ययोषितोऽभवत् अनेनतासामप्यनुरागःसूचितः ८९ अस्यवक्षसीमामिर्वलान्त्वास्याह्वेत्याह युद्धेत्यादिसर्वाइतिबाहुल्यात्ःमि
प्रायं आसांहरणेपततदपुभिर्युद्धंभवतीतियुद्धकामानाःसर्वहृताः काश्चित्समदास्तरुणामदमोहिताः स्वयमेवैनंवृतवत्यः ९०

श्री रा वा तं टी ४२

83 मुस्यैव विवरणं नतत्र काश्चिदिति वीर्योपपन्नेनापि तेन नतस्य तासु मध्ये काश्चित्प्रमदाः प्रसह्य नत्ताः किंतु गुणेनैव तिरस्तिर्येव स्वयं
वीर्ये सौंदर्यादि गुणेन तस्य तत्र प्रवलब्धाः तत्र लकायामन्यकामा चैनाहृता अन्यस्य वा चिनाहृता कथमेवं प्रसह्यापलापस्तत्राह हि
नैमित्तिवराहीं श्रेष्ठरामाहीं २१ उपचार उत्तमां वरभूषणमाल्यादिः कांतस्य रावणस्य कामनीया मनोज्ञानताहशी चन २२ ग्रन्थसीनां

न तत्र कांचित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः न चान्यकामापि न चान्यपूर्वा
विना वराहीं जनकात्मजां तु २१ न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता
भार्याभवत्तस्य न हीनसत्त्वा न चापि कांतस्य न कामनीया २२ बभूव बुद्धिस्तु हरीश्वरस्य
यदीदृशी राघवधर्मपत्नी इमा महाराजस्य राजभार्याः सुजातमस्येति हि साधुबुद्धेः २३

येन तत्स्मृतं गतानानवेति विकल्प्याप्येरावणस्य भद्रमेवेति बुद्धिः हनूमतो जातेत्याह बभूवेति साधुबुद्धेर्हरीश्वरस्येति बुद्धिर्व
भूव इमा महारावणस्य राजभार्या यथानुरूपाः राघवधर्मपत्न्यपि ईदृशी प्रतदतंगुणापतेद भक्ता च यदि स्यात्तदा स्यरावणस्य
सुतानां भद्रमेव भवति रावणाभक्तेति मयानिवेदिते सति सीताया स्तताया मिव राघवस्यापि प्राद्भवणावधयत्नाप्रसक्तेरि

सुन्दरकांडं ३३ ४२

84 यदीत्यनेनसूचितमस्युपवस्यानंतासंभावितत्वमाह पुनश्चेति पद्मानंतरंचसोचिंतयत् विचारेणनिश्चितवानित्यर्थः चिंताप्रकारःदि
प्रसिद्धमेतत्पत्नीतादेवीगुणतः पातिव्रत्यादिगुणैर्विशिष्टा अथयतस्तथैयतोमहावलोलंकेश्वरः निरवधिकैश्वर्यवैशि
ष्ट्यमनेनसूचितं देहयेतास्याजानकयाप्रत्यर्पकमोपहरणरूपंकर्म आर्तरूपः परिगृहीतमायारूपः सन् कृष्णसक्लेशाययथा
भवतितथातथाकृतवान् ययेषापेश्वर्यो दोसरागास्यात दोसरमत्रपवनयेनस्यात् नचनदक्तिश्रस्माभिः नोद्विकोषाना

पुनश्चसोचिंतयदार्त्तरूपोध्रुवंविशिष्टागुणतोहिसीता अथायमस्यांकृतवान्महात्मालं
केश्वरःकष्टमनार्यकर्म ॥ १४ इत्यार्षेरामायणेसुंदरकांडेनवमःसर्गः ९ तत्रदिव्योप
मंमुख्यंस्फाटिकंरत्नभूषितं अवेक्षमाणोहनुमान्ददर्शशयनासनं ।

देशावगेणेनक्लेशाहंवंनयनस्यचानुभवादिनाशयाः आर्तंरूपइतिपादे आर्तंसजातंरूपंयस्येत्यर्थःहनुमद्विशेषणं आंतरपीडाव्य
ञ्जकरूपइत्यर्थः १४ वासमानः इत्यार्षेरामायणेसुंदरकांडेनवमःसर्गः ९ तत्रशायांदिव्योपमंदिविभवेनस्वर्गीत्तिपवा
र्थैनैवोपमायस्यतत् शयनस्यासनंपल्यंकप्रतिष्ठापनवेदिकांअवेक्षमाणइतनस्ततःपश्यन् ।

श्री गा सं
वा टी
५३

85 तस्यैव वर्णनं दांतेत्यादि गजदंतमयानि स्वर्णमयानि च चित्राणि चित्रयुतानि अंगणानि प्रादादिरूपाणि येषां तैर्महार्हास्तरणोपेतैः व
हुमूल्यास्तरणयुक्तैः वैडूर्यैरिंद्रनीलवर्णं वैडूर्यपद्मरागादिनिर्मितैर्वरासनैः श्रीशयनपल्यंके महार्घैर्बहुमूल्यैरुपपन्नं २ परमासने
तस्यैकदेशे ददर्श अशोकपुष्पमालायुक्ते यद्वायत्नतिथानेशोकाभावस्ताद्दृशमालायुतं चित्रभानुरग्निः ४ वालव्यजनवाम

दांतकांचनचित्रांगैर्वैडूर्यैश्च वरासनैः महार्हास्तरणोपेतैरुपपन्नं महाधनैः २ तस्यैवैक
तमे देशे दिव्यमालोपशोभितं ददर्श पांडुरं छत्रं ताराधिपसंन्निभं ३ जातरूपपरिक्षिप्तं चित्र
भानोः समप्रभम् अशोकमालाविततं ददर्श परमासनं ४ वालव्यजनहस्ताभिर्वी
ज्यमानं समंततः गंधैश्च विविधैर्जुष्टं वरधूपेन धूपितं ५ परमास्तरणास्तीर्णमाविका
जिनसंवृतम् दामभिर्वरमाल्यानां समंतादुपशोभितं ६ तस्मिन्जीमूतसंका
शं प्रदीप्तोज्वलकुंडलं लोहिताक्षं महाबाहुं महारजतवाससं ७ लोहितेनानुलिप्तां
गं चंदनेन सुगंधिना संध्यारक्तमिवाकाशे तोयदं सतडिद्गुणं ८

रंतत्तु संभोगगृहे तत्रापि निद्रास्थानस्य कथं वालव्यजनं कथं च दृश्यतत्तस्ताभिर्दर्शनमिति चेन्न ये च निर्मितस्त्रीप्रतिमादिभिः तत्रापि
तत्संभवात् ५ आविकाजिनं ऊर्णायुक्तमेतद्धि परमस्फुरलं तेन संवृतं संवृतप्रदेशमाल्यपुष्पं ६ तस्मिन्नस्य प्रमितिशेषः महार
जनं स्वर्णेन तंतुनिर्मितवाससा थाविणं ७ रावणस्य तडित्स्थानीयं पीतवर्णवासः ८

५३

86 महद्वनगुल्माढ्यं पुष्पसहितमहद्वनगुल्माढ्यं मंदरमिवस्थितं वाह्यवोस्यवृक्षानामादयोगुल्माः ॥१॥ पीत्वाप्युपरतं
सुपिनाक्रीडित्वाप्युपरतं ॥ यथानागेगजमिवनि श्वसंतंरावणं प्रासाद्याप्युपरमाद्विग्नः अयंपापी देवीत्यक्तवानित्येतत्स
सीयेवस्यानमनुचितमितिखिन्नविन्नोपासर्पत सभीतवत सभीतोयथाभयहेतुपिशाचादिसंभवेस्यात्तमशंक्याः प्रसर्प

हेमभाभरणोद्दीप्तैः स्वरूपंकामरूपिणं सहद्वनगुल्माढ्यं प्रसुप्तमिवमंदरं ॥१॥ क्रीडित्वो
परतंरात्रौवराभरणभूषितं प्रियंराक्षसकन्यानांराक्षसानांसुखावहं पीत्वाप्युपरतंचापि
ददर्शसमहाकपिः भास्वरेशयनेवीरं प्रसुप्तंराक्षसाधिपं ॥ निःश्वसंतंयथानागंरावणंवा
नरोत्तमः आसाद्यपरमोद्विग्नःसोपासर्पत्सुभीतवत् अथारोहणमासाद्यवेदिकांतरमाश्रितः
सुप्तंराक्षसशार्दूलंप्रेक्षतेस्ममहाकपिः सुशुभेराक्षसेंद्रस्य स्वपतःशयनोत्तमे गंधहस्ति
निसंविष्टेयथाप्रस्रवणंमहत् ॥४॥ कांचनांगदसंनद्धौददर्शसमहात्मनः विक्षिप्तौरा
क्षसेंद्रस्यभुजाविंद्रध्वजोपमौ ॥५॥

मितमहत् ॥२॥ आरोहणंसोपानंवेदिकांतरं सोपानपर्वमध्यं ॥३॥ यस्यगंधेनान्येगजाःपलायंतेसगंधगजाः मत्तगजेनान्वितंसं
विष्टंप्रथितंमहत्प्रस्रवणमिव ॥४॥ महात्मनःमहाशरीरस्यविक्षिप्तौप्रसारितौ ॥५॥

ओं श्री
रा वा
मु टी
४४

87 आपीडनेपुडे कृतव्रणौ कृतव्रणकिणौ वज्रेणोल्लिखितौ ततो पीनांसौ ययोस्तौ वज्रचक्रयोरप्यसाध्यत्वमुक्तमिति भावः १७ समौ सुजातौ यौ बा
सौ संगतौ दृढसंधिबंधौ स्वङ्गुलीयकलक्षितौ शोभनाङ्गुलीयकभूषितौ १८ शशस्य क्षतजं रक्तं मनिलोहितवर्णं १९ उत्तमस्त्रीणां विमर्दितौ वि

ऐरावतविषाणाग्रैरापीडनकृतव्रणौ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ १७ पीनौ
समसुजातांसौ संगतौ बलसंयुतौ सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीयकलक्षितौ संहतौ परिघा
कारौ वृत्तौ करिकरोपमौ विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ १८ शशक्षतजकल्पेन
सुशीतेन सुगन्धिना चन्दनेन परार्ध्येन स्वनुलिप्तौ स्वलंकृतौ १९ उत्तमस्त्रीविमृदितौ गन्धोत्त
मनिषेवितौ यक्षपन्नगगन्धर्वदेवदानवरावणौ २० ददर्श स कपिस्तस्य बाहू शयनसंस्थि
तौ मन्दरस्यान्तरे सुप्तौ महाही रुषिताविव २१ ताभ्यां स परिपूर्णाभ्यामुभाभ्यां राक्षसेश्वरः
शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः २२

मर्दनमालिंगनादिर्ययोस्तौ २० ददर्शेत्यस्यादरेणाददर्श
नानः पुनरुक्तिः महाहावसर्पौ अग्रे द्विभुजत्वकथनात् युद्धादिकालपर्यवं विंशतिभुजत्वं दशशीर्षत्वं चेति बोध्यं २१

धय

88 वकुलोत्पलसंयुतः उत्पलवकुलगंधयुक्तः अयं पुरुषविशेषस्यास्य धर्मे रतिकनकः चूतादिसुरभिलंबनतद्दधिवासितवस्त्रसेवनात् स्पर्शन
रससंयुतः षड्रसान्नगंधोपेतः पानंमधुरात्तसत्वादेववामाचारेणरत्नाकरणात्मधुपानं २२४ अपहृतेननिद्रावशात्पर्यस्तेनविराजता
मुकुटेनउपलक्षितमितिशेषः २५ शोभिनाहारेणशोभनहारवता वक्षसोपलक्षितमितिशेषः २६ अपविद्धेनपर्यस्तेनपांडुरेणक्षौमेण

नानापुष्पागमसुरभिर्वकुलोत्पलसंयुतः स्पर्शनरससंयुक्तः पानगंधयुतः सरः २३ तस्याग्रेत्स
राजस्यनिस्यक्रामममहाबाहुवान् शायानस्याविनिश्वासः स्वयंनिवतस्तृते मुक्तामणिविचित्रेण
कांचनेनविराजता मुकुटेनापहृतेनकुंडलोज्वलिताननं २५ रत्नचंदनदिग्धेनतथाहारेणशो
भिना पीतायतविशालेनवक्षसाभिविराजता पांडुरेणापविद्धेनक्षौमेणक्षतजेक्षणं महार्ह
णसुसंवीतपीनेनोत्तरवाससा २७ मापृष्ठ्यश्वेतीकाशेनप्रसुप्तंभुजगवत् गांगेमहतितोयांते
प्रसुप्तमिवकुंजरं २८ चतुर्भिःकांचनैर्दीपैर्दीप्यमानंचतुर्दिशं प्रकाशीकृतसर्वांगंमेघंविद्युद्गु
णैरिव २९

परिधानीयेनकटेरधःसंपीतंपीतेनोत्तरीयेणसंवीतमित्यर्थः तोयांतेतोयमध्ये २८ कांचनैः कांचन
स्तंभगैः चतुर्दिक्षुदीप्यमानंअत्यंतसंयोगेद्वितीयाविद्युद्गुणैरिवेतिपाठेयुक्तमार्षं २९

ॐ श्री रा वा सुं टी ४५

41 अक्लृप्तांगरावर्णाददर्श पादमूलगतास्तत्स्त्रीश्चददर्श रक्षःपतेर्विदे इत्यन्वयः २० अम्लानमाल्याभरणादेवकल्याश्च अर्थः २१ राक्षसेंद्रभुजां
कंचगच्छतिताः तथाप्रियाश्चेतियावत् धारिणः धारिण्योनिषण्णाःशायिताः २२ वाहूयथानत्वादंगदानामपिश्रवणांतेदर्शनबोध्यं २३

पादमूलगताश्चापिददर्शसमहात्मनः पत्नीःसप्रियभार्यस्यतस्यरक्षःपतेर्विदे २० शोणिप्रका
शवदनावरकुंडलभूषणाः अम्लानमाल्याभरणाददर्शहरियूथपः २१ नृत्यवादित्रकुशलारा
क्षसेंद्रभुजांकगाः वराभरणनिक्षेपोषिता ददर्शतापनीयाविद्योनिषण्णादृष्टोकपिः २२
वज्रवैदूर्यगर्भाणिश्रवणांतेषुयोषितां ददर्शतापनीयानिकुंडलान्यंगदानिच २३
तासांचंद्रोपमैर्वक्त्रैःशुभैर्ललितकुंडलैः विराजतविमानंतन्नभस्तारागणैरिव २४
मदव्यायामखिन्नास्ताराक्षसेंद्रस्ययोषितः तेषुतेष्ववकाशेषुप्रसुप्तास्तनुमध्यमाः २५
अंगहारैस्तथैवान्याकोमलैर्नृत्यशालिनी विन्यस्तशुभसर्वांगीप्रसुप्तावरवर्णिनी २६

विमानंमंचकविशेषः पुष्पकमित्यन्ये विराजतव्यराजत २४ मदव्यायामेनरतिजन २५ कोमलैःमृदुकर्कशैःअंगहारैः अंगविक्षेपैःएतत्
शालिनीति वासनावलेनन्त्याभिनयोपेतयाप्रसुप्तवतीत्यर्थः विशेषेणन्यस्तंशुभंपृथगाज्ञातांदृष्टानिसर्वाण्यंगानियस्याः २६

१० महानदीप्रकीर्णांमहानद्यांप्रकीर्णापुष्पपत्रादेर्वासंगतंपोतंप्लवमाश्रितानलिनानलिनीपद्मिनीवयोत्स्यानेत्रवीणा ३७ मंडु
कोवाद्यभेदः ३८ न्यस्यआलिंग्येत्यर्थः ३९ कांचिदिति ४० विपंचीवीणाविशेषः ४२ मदकृतश्रमया मदवतोश्रुशश्रायचवादनेनतत्कृ

काचिद्वीणांपरिषज्यप्रसुप्तासंप्रकाशते महानदीप्रकीर्णेवनलिनीपोतमाश्रिता ३७
अन्याकक्षगतेनैवमंडुकेनासितेक्षणा प्रसुप्ताभामिनीभातिबालपुत्रेववत्सला ३८
पटहंचारुसर्वांगीन्यस्यशेतेशुभस्तनी चिरस्यरमणंलब्ध्वापरिषज्येवकामिनी ३९
कांचिद्वीणांपरिषज्यसुप्ताकमललोचना वंशंप्रियतमंसहसामेवहिकामिनी ४०
विपंचींपरिगृह्यान्यानियतान्नृत्तशालिनी निद्रावशमनुप्राप्तासहकांतेवभामिनी ४१
अन्याकनकसंकाशैर्मृदुपीनैर्मनोरमैः मृदंगंपरिविध्यांगैःप्रसुप्तामत्तलोचना ४२
भुजपार्श्वांतरस्थेनकक्षगेनकृशोदरी पणवेनसहानिंद्यासुप्तामदकृतश्रमा ४३
डिंडिमंपरिगृह्यान्यातथैवासक्तडिंडिमा प्रसुप्तातरुणंवत्समुपगूह्येवभामिनी ४४

तश्रमा च ४३ डिंडिमंपरिगृह्यआलिंग्य आसक्तडिंडिमापृष्ठदेशसंबद्धान्यडिंडिमा तरुणंरमयां वत्संपुत्रंचपरिगृह्यप्रसुप्तमेव ४ ५

श्री
रा. वा.
म. टी.
४८

आडंबरं वाद्यभेदः भुजसंभोगेन भुजाश्लेषेण पीडितं आश्लिष्टं कृत्वा ४५ कलशीं जलसंभृतामपविध्य पर्यस्य स्वपर्यस्तकलशोदकार्द्रशरी
रा नारी वसंते परिमार्जिता स्नानिपरिहाराय कृतजलसेका पुष्पशबलाशबलपुष्पा मालेव भाति ४६ आतोद्यानि वाद्यानि ४९ अथप्र

काचिदाडंबरं नारी भुजसंभोगपीडितं कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ४५
कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी वसंते पुष्पशबला मालेव परिमार्जिता ४६
पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ उपगूह्याबला सुप्ता निद्राबलपराजिता
अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना अन्यामालिंग्य सुश्रोणी निद्रावशमुपागता
आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानि
व तासामेकांतविन्यस्ते शयानां शयने शुभे ददर्श रूपसंपन्नामपरां स कपिः स्त्रियं ५०
मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषितां विभूषयंतीमिव च स्वश्रिया भवनोत्तमं ५१
गौरीं कनकवर्णाभामिष्टामंतःपुरेश्वरीं कपिर्मंदोदरीं तत्र शयानां चारुरूपिणीं ५२

धानमहिषीदर्शनं तासामिति एकांतविन्यस्तेनासाधारणेन शयने स्थितां न्यस्तेनां स्त्रियं वक्ष्यमाणगुणां स्त्रियं ५० गौरी पीता मतएव कन
कवर्णाभा इष्टां रावणस्यातिप्रियां अंतःपुरस्त्रीणामीश्वरीं कपिर्मंदोदरीं ददर्शेत्यन्वयः ५१ ५२

९२ तर्कयामास संभावयामासद्रूपयोगेकांतेप्रममंचेप्रतिरूपायादर्शनात्मापेणोयंसीतेतिसंभावनाहनूमतः नदेवाहरूपयौवनसंपदा·
नेत्ताचिन्नालोचनंकृतवानितिभाव हर्षोमुखविकासादिः आनंदोमानसः ५३ आनंदकार्यद्वाराह आस्फोटयामासेति आस्फो
टशब्दंकुर्वनादितासेथमः जगामस्तंभानित्मनुकर्षः सर्वाग्रमेनाश्लेषाउपांशुतिवाध्यपवंचेष्टायांहेतुःस्वाकपीनांप्रकृतिंति

सतांदृष्ट्वामहामहावाहुर्भूषितांमारुतात्मजः तर्कयामाससीतेतिरूपयौवनसंपदा
हर्षेणमहतायुक्तोननंदहरियूथपः ५३ आस्फोटयामासचुचुंवपुच्छंननंदचिक्रीडजगौ
जगाम स्तंभानरोहन्निपपातभूमौनिदर्शयन्स्वांप्रकृतिंकपीनां ५४ इत्यार्षेसुंदरकांडे
दशमःसर्गः १० अवधूयचतांवुद्धिंवभूवावस्थितस्तदा जगामचापरांचिंतांसीतांप्रतिमहा
कपिः १ नरामेणावियुक्तासास्वप्तुमर्हतिभामिनी नभोक्तुंनाप्यलंकर्तुंनपानमुपसेवितुं २

दर्शयन्निति ५४ वाममानः इत्यार्षेसुंदरकांडेदशमःसर्ग १० अवधूयचतांवुद्धिं सीतासंभावनयाप्रवृत्तांकार्येयविषयांवुद्धिमवधू
यत्यक्त्वाअवस्थितःस्थिरतास्वभावेप्रतिष्ठितः सीतांप्रतितद्विषयामितरामन्यांचिंतांसर्वचिंताविघटिकांजगाम १ तामेवचिं
तामभिनयति नरामेणेति २

श्री
रा. वा
स. टी.
५८

93 अन्यतरं पुरुषमुपस्थानमंगीकर्तुं नार्हतीति नाध्यवस्यति न त्वेहेतुं न द्विरामेति ३ यद्येवं तोन्वेष्यमनुभूतेनेति निश्चित्य तत्र गेहे पानभूमौ
पानशालायां चचार पुनः सम्यगन्वेषणायेति शेषः ४ अथ पानभूमौ दर्शनप्रकारः क्रीडितेनेत्यादि क्रीडया क्लान्ताः तत्रस्त
वचनिद्रिता इति शेषः विप्रहताः प्रतिनिद्रिताः स्त्रियो ददर्शेति शेषः ५ मुरजेषु मृदंगेषु चेलिकासु चेलिका वाद्यविशेषस्तन्याङ्कः

नान्यं नरमुपस्थानं सुराणामपि चेश्वरं न द्विरामसमः कश्चिद्विद्यते त्रिदशेष्वपि ३ अ
न्वेष्यमिति निश्चित्य भूयस्तत्र चचार सः पानभूमौ हरिश्रेष्ठः सीतासंदर्शनोत्सुकः ४
क्रीडितेनापराः क्लान्ता गीतेन च तथापराः नृत्येन चापराः क्लान्ताः पानविप्रहतास्तथा ५
मुरजेषु मृदंगेषु चेलिकासु च संस्थिताः तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ६
अंगनानां सहस्रेण भूषितेन विभूषणैः रूपसल्लापशीलेन युक्तगीतार्थभाषिणा ७

तेषु प्रसक्ता एव संस्थिता एव निद्रिताः संविष्टाः सुप्ता ददर्शेति शेषः आकर्षेत्वा ६ रूपसल्लापशीलेनेति नानिद्रोद्भवमप्राप्तस्यात्र
स्यात्रपविषयोयः सल्लापी वर्णनं तच्छीलेन युक्तं यथा भवति तथा गीतार्थस्य भाषणशीलेन ७

५८

९५ देशकालाभियुक्तेनदेशविषयपरिज्ञानकुशलेनयुक्तवाक्यस्यदेशकालोचितवाक्यस्याभिधानशीलेनएतत्सर्वंनिद्रोद्भमवशादे
वबोध्यं रताधिकेनअत्यन्तसक्तेनभगवतासंयुक्तांपानभूमिंददर्श ८ अन्यत्रापीत्यादिश्लोकद्वयंनव्याःप्रमादात्पठंति अन्यत्रापिपानभू
रावणशयनगृहेबहिःस्थांपानभूमिंदृष्ट्वापुनःशयनस्थानेआगत्यान्वेषणंरूपविषयोयः सोल्लापोवर्णनंतस्मिन्वेशायाना

देशकालाभियुक्तेनयुक्तवाक्याभिधायिना रताधिकेनसंयुक्तांददर्शहरियूथपः ८ अन्यत्रा
पिवरस्त्रीणांरूपसल्लापशायिनां सहस्रंयुवतीनांतुप्रसुप्तंसददर्शह ९ देशकालाभियुक्तं
चयुक्तवाक्याभिधायिनं रताविरतसंसुप्तंददर्शहरियूथपः १० तासांमध्येमहाबाहुःशुशुभे
राक्षसेश्वरः गोष्ठेमहतिमुख्यानांगवांमध्येयथावृषः ११ सराक्षसेन्द्रःशुशुभेताभिःपरिवृतःस्वयं
करेणुभिर्यथारण्येपरिकीर्णोमहाद्विपः १२ सर्वकामैरुपेतांचपानभूमिंमहात्मनः ददर्श
कपिशार्दूलस्तस्यरक्षःपतेर्गृहे १३ मृगाणांमहिषाणांचवराहाणांचभागशः तत्रन्यस्ता

नांयुवतीनांवरस्त्रीणांसहस्रमुच्यमानयुतांददर्श तत्सर्वंदृष्टंरतान्तेविस्रस्तं निमांसानिपानभूमौददर्शसः १४
समंगाढसमं १० तासांमध्येशंति ११ सशति १२ सर्वकामैरवणस्तद्गृहेपुनःसम्यगन्विष्यपुनर्बहिःपानभूमिमागत्यविविनोति
सर्वकामैरितिसर्वंन्यायादियुक्तंतस्यस्त्रीमात्रदर्शनं इदानींतस्याःसर्वकामोपेतत्वदर्शनं १३ तदेवप्रपंचयति मृगाणामिति १५

श्री
भा वा
स्कं टी
५८

95 १५ भनः भनवैराद्रोदिस्यादिकथनं वङ्गस्य लवर्तितपाभृपस्त्वप्रकाशनाय वाध्रीणास्ः पक्षिविशेषः कृष्णग्रीवो रक्तशिराः
श्वेतपक्षो विहंगमः सवैवाध्रीणासः प्रोक्त इति विस्तृथमाले: छागविशेषोवा. त्रिपिबन्निन्द्रियक्षीणं श्वेतं वृद्धं मजापतिं वाध्रीणसं
वतमाज्ञयाज्ञिकाः श्राद्धकर्मणीति स्मृतेः मांवक र्णाविपानसमये जलस्पर्शांत्रिपस्सः त्रिपिवः वाध्रीणसः खङ्गस्य गइति हृ
लायुधः दध्यासेवं वर्वेलनलवणाविशेषेणवाप्रुतान्संस्कृतान् १६ कृकलद्रुकरौ ससौ पक्षिविशेषवाचकौ पकाशल्पामत्स्य

रौकोऽप्रचविशालेष्वभाजनेषप्रभक्षिताणान् ददर्शकपिशार्द्रेलामस्तानकुरूद्दांस्तथा १५
वराहवाध्रीणसकान्दधिसेवर्वलाप्रुतान् शल्यान्कसाम्मस्यांश्च हृद्यमानल्लवैन्दन कृपलाल्व
विर्याश्छागाश्छशकानर्थमदिताना महिषानेकशल्यांश्च च्छेदांश्च कृत्निष्ठितान् १७
लेह्यान्नबावचान्पेयान्भोज्यान्नुच्चावचानपि तथाम्लवलवणान्नेमेविविध
पैरागखाण्डवैः १८ ॐनमोभगवते वासुदेवाय: १

विशेषाः कृतनिष्ठितान् कृतंनिष्ठितेनिष्ठानंपाकोयेषांतान् १७ अम्लरसोलवणारसस्तयुक्तं सोजिकाजाद्यपरिहारकर्तायेष्वम
त्यम्मरोणाश्रुतेः रागखाण्डवैः सितामधादिमधुरोद्रावृक्षादाउमनोरसः विरलश्चेनकृतोरागः सांद्रश्चेतखाण्डवःस्यतन्त्रशक्तैः
केसरादिभिः कृतवर्णाः षड्रसोपेताःस्यारागखाण्डवास्त्वत्वे १८

96 महार्घैर्नैकरूपैः १९ सुश्लिष्टैः सुकृतसंधिबंधैः २० उक्तैः सौवर्णरत्नमयशयनासनैः पानभूमिः प्रदीप्तेवोपलक्ष्यते बहुप्रकारैः बहुपा
दानभेदैरन्नपानविविधैर्विविधरसवद्भिः वरसंस्कारिणा श्रेष्ठसंस्कारस्कंदद्रव्ययोगेन संस्कृतैः २१ उपालसंयुक्तैरिति शणापावकेप
कैर्मांसैः सद्योच्यमानगुणाः स्वरादर्शा तत्रादिव्याः सुराः हृद्येभ्यः कदंबादिभ्यः स्वनः प्राउर्भूताः कृताः सुराः पैष्टिकेत्यादिताः २२

महान्नस्तबकैश्चूरैरपि विद्धैर्महासनैः पानभाजनविच्छिन्नैः फलैश्च विविधैरपि १९ कृतपु
ष्पोपहारा भूरधिकां पुष्यति श्रियं तत्र तत्र च विन्यस्तैः सुश्लिष्टशयनासनैः २० पानभू
मिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः २१ मांसैः कुशा
लसंयुक्तैः पानभूमिगतैः पृथक् दिव्याः प्रसन्ना विविधाः सुराः कृतसुराश्चापि २२ शर्करास
वमाध्वीकाः पुष्पासवफलासवाः वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक्पृथक् २३ संत
ता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः हिरण्मयैश्च कलशैर्भाजनैः स्फाटिकैरपि २४

कृतसुरावांतरभेदानाह शर्करासवेत्यादि शर्करोपादानकश्चासवः शर्करासवः मधूपादानो माध्वीकः द्राक्षोपादानक इत्यन्ये मधू
कपुष्पासवः खर्जूरफलादिजः फलासवः वासचूर्णैः सुगंधिद्रव्यचूर्णैः मृष्टाश्चापि वासिताः इष्टा इति शेषः २३ पुष्पभूमिवर्णनं बहु
प्रदेशेषु संस्थितैर्माल्यैः संतता व्याप्ता भूमिः शुशुभे उच्यमानाविशेषणैः करकैश्चैवं संतता २४

९७ राजतादिषु कुंभेषु २५ पानश्रेष्ठं संस्कृतप्रशस्तपानं सीधोर्मधस्य भाजनीत्यन्वयः २६ भाजनानि पानभाजनानि अर्धावशेषाणि अ
र्धावशिष्टपानानि पीतानि पीतासर्वाणि २७ नैवप्रपीतानि ईषदास्वादितानि पानानि पानभाजनानि विभागतः विभागेन पानं दद

जांबूनदमयैश्चान्यैः करकैरभिसंवृता राजतेषु च कुंभेषु जांबूनदमयेषु च २५ पानश्रेष्ठं
तथा भूमिं कपिस्तत्र ददर्श ह सोपश्यच्छातकुंभानि सीधोर्मणिमयानि च २६ तानि तानि च
पूर्णानि भाजनानि महाकपिः क्वचिदर्धावशेषाणि क्वचित्पीतान्यशेषतः क्वचिन्नैव प्रपीता
नि पानानि स ददर्श ह क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पानं विभागतः २८ क्वचिदर्धावशे
षाणि पश्यन्वै विचचार ह शयनान्यत्र नारीणां शून्यानि बहुधा पुनः २९ परस्परं समाश्लि
ष्य काश्चित्सुप्ता वरांगनाः काचिच्च वस्त्रमन्यस्याः स्वपन्त्याः परिधाय च ३० उपगम्याबला सुप्ता
निद्राबलपराजिता तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजं नात्यर्थं स्पंदते चित्रं प्राप्य मं
दमिवानिलं ३१

र्शश्च नमस्कमिदममुकमिति विभज्य ददर्शेत्यर्थः २८ शून्यानि पतिशून्यानि युक्तमेव परस्परं समाश्लिष्येति २९ अपरस्याः स्वपन्त्याबला
तरहीनोपगूह्य प्राहृत्य उपगम्य तत्स्वपनस्थानं प्राप्य तां वपश्यति च चारेति संबंधः ३० गात्रजं गात्रस्थं ३१

९४ अथपानभूमितोपिवहिरागत्यतत्रोस्थितेपुष्पकेप्रवृत्तिकालस्वनिर्गमकालेपिबहुगंधोवायुरन्यास्त्रियस्थानुभूतास्माह चंदनस्ये
त्यादिपानभूम्यादिकमोपपुष्पकस्यमेवेत्यत्रे सीधुमद्यं २२ स्नानानांचंदनानामितिपाठेस्नानार्हचंदनानामित्यर्थः विविधंग
धमुद्वहन्नेवववौप्रतपवसुरभिगंधोविमानेमूर्छितोव्याप्तः २३ तत्रान्याःवहिःप्रतिष्ठितपुष्पकेस्थाः २४ राक्षसालयेप्रांतर

चंदनस्यचशीतस्यसीधोर्मधुरसस्यच विविधस्यचमाल्यस्यपुष्पस्यविविधस्यच २२ व
हुधामारुतस्तत्रगंधंविविधमुद्वहन् स्नानानांचंदनानांचधूपानांचैवमूर्छितः २३
प्रववौसुरभिर्गंधोविमानेपुष्पकेतदा श्यामावदातास्तत्रान्याःकाश्चित्कृष्णावरांगनाः
काश्चित्कांचनवर्णांग्यःप्रमदाराक्षसालये तासांनिद्रावशत्वाच्चमदनेनाविमूर्छितं
पद्मिनीनांप्रसुप्तानांरूपमासीद्यथैवहि २८ एवंसर्वमशेषेणरावणांतःपुरंकपि ददर्श
समहातेजानददर्शचजानकीं ३०

मध्यवहिःकक्षोपक्षितेसर्वत्र २५ निद्रावशत्वात्मदनेनतद्गेत्वरत्वाचमूर्छितंव्याप्तंतासांरूपंप्रसुप्तानांरात्रौमुकुलितानां
पद्मिनीनांनलिनीयथारूपंतथैवासीत् एवंप्रकारेणददर्श २८ २९

श्री
वा रा
सु टी
५

११ ततो निरीक्षणानंतरं नेक्षेत नग्नां परस्त्रियमिति शास्त्रस्मरणादिति शेषः तदेवाह धर्मेति धर्मलोपनिमित्तं यत्साध्वसं भयं तेन युतेन शं
कितो भीत इत्यन्वयः ३८ धर्मलोपं दर्शयति परदारावरोधस्य दारशब्दः स्त्रीसामान्यवाची अवरोधशब्दः स्वधर्मयुक्तकुलस्त्रीवाची
प्रसुप्तस्येत्यनेन नग्नप्रायत्वं सूचितं तत्समये वसनानां विपर्यासात् ३९ मे दृष्टिः परदाराणामद्ययावत् विषयवर्तिनीति किंच परदा

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः जगाम महतीं शंकां धर्मसाध्वसशंकितः
परदारावरोधस्य प्रसुप्तस्य निरीक्षणं इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ३९
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी अयं चात्र मया दृष्टः परदारपरिग्रहः ४० तस्य
प्रादुरभूच्चिंता पुनरन्या मनस्विनः निश्चितैकांतचित्तस्य कार्यनिश्चयदर्शिनी ४१

रपरिग्रहस्तद्धर्ता अतिपापी रावणश्च दृष्टः तादृशादर्शनमपि धर्मलोपकारीति भावः ४० अथ पुनर्विचारेण तद्दोषबुद्धिरपगतेत्याह
तस्येति अन्या चिंता पूर्वचिंताविरोधिनीति निश्चितः प्रमाणप्रतिपन्नः एकांतः सिद्धांतो यत्र तद्विषयज्ञानं चित्तं यस्य सः अतएव सा चिं
ता कार्यनिश्चयदर्शिनी कर्तव्याकर्तव्यनिर्णयसमर्था ४१

५

100 तांचिंतामभिनयति काममिति विश्वस्ताःस्वनरालोकनशंकारहिताः वैकृत्यंविकारःस्वार्थेष्यञ् नोपपद्यतेनप्राप्नोति ४२ ततःकिंतत्राह
मनोहीति शुभाशुभास्ववस्थासुपुण्यपापकर्मसुइंद्रियाणांप्रवर्तनेमनोहेतुः मनसोःसत्सदर्थोरागद्वेषतः इंद्रियप्रवृत्तिर्द्वियापाय इयंतम
मप्रवृत्तिर्नोपापाय यतस्तन्मेमनःसुव्यवस्थि परदारेषुनरागवत् पुण्यपापव्यवस्थायांचस्वांविनैवमस्वाद्वीति भावः ४३ किंच राजा

कामंदृष्टामयासर्वाविश्वस्तारावणस्त्रियः नतुमेमनसःकिंचिद्वैकृत्यमुपपद्यते ४२
मनोहिहेतुःसर्वेषामिंद्रियाणांप्रवर्तने शुभाशुभास्ववस्थासुतच्चमेसुव्यवस्थितं ४३
नान्यत्रहिमयाशक्यावैदेहीपरिमार्गितुं स्त्रियोहिस्त्रीषुदृश्यंतेसदासंपरिमार्गणे ४४
यस्यसत्वस्ययायोनिस्तस्यांतत्परिमार्गते नशक्यंप्रमदानष्टामृगीषुपरिमार्गितुं ४५
तदिदंमार्गितंतावच्छुद्धेनमनसामया रावणांतःपुरंसर्वंदृश्यतेनचजानकी ४६ देवगं
धर्वकन्याश्चनागकन्याश्चवीर्यवान् अवेक्षमाणोहनुमान्नैवापश्यतजानकी ४७

ज्ञानुष्ठानरूपसेवकीयपरमधर्मान्यथात्वप्रसक्त्याधिनदोषस्तत्राह नान्यत्रेति तत्रहेतुः स्त्रियोहीति सदासंपरिमार्गणव्यवहारेलो
केइतिशेषः ४४ सजातीयेष्वेवमार्गणंप्रसिद्धमित्याह यस्येति सत्वस्यप्राणिनः यायोनिःयासमानजातिः परिमार्गतेलोक
इतिशेषः नेत्रैवोपपत्तिमाह नशक्यमिति एतेनरावणादर्शनजोपिदोषःपरिहृतः ४५ ४६ ४७

श्री
वा रा
सुं टी
५१

१०। अपक्रम्यरावणांतःपुरवहिःकचातइतिशेषः ४८ तांसीतामन्यत्रविचेतुमवचक्रमे ४९ आयावमानः इत्यार्षेरामायणेसुंदरकां
डेपंचदशःसर्गः ॥ अथवद्धेःखचिंताकुलोविशेषमेवपुनःपुनरन्वेषयतिस्मेत्याह सततस्येति तस्यभवनस्यरावणस्य। प्रधियतेन

तामपश्यन्कपिस्तत्रपश्यंश्चान्यावरस्त्रियः अपक्रम्यतदावीरःप्रस्थातुमुपचक्रमे ४८
सभूयःसर्वतःश्रीमान्मारुतिर्यत्नमास्थितः आपानभूमिमुत्सृज्यतांविचेतुंप्रचक्रमे ४९
इत्यार्षेरामायणेसुंदरकांडेपंचदशःसर्गः ॥ सतस्यमध्येभवनस्यसंस्थितोलतागृ
हाश्चित्रगृहान्निशागृहान् जगामसीतांप्रतिदर्शनोत्सुकोनचैवतांपश्यतिचारुदर्शनां।
सचिंतयामासततोमहाकपिःप्रियामपश्यन्रघुनंदनस्यतांध्रुवंनसीताम्रियतेयथान
मेविचिन्वतोदर्शनमेतिमैथिली साराक्षसानांप्रवरेणवालास्वशीलसंरक्षणतत्परा
सती अनेननूनंप्रतिदुष्टकर्मणाहताभवेदार्यपथेपरेस्थिता २

वनस्पतिशाखवृंदराश्चितिवामगर
हं तान्विचेतुंजगाम। ध्रुवंम्रियतेनजीवतिस्म ध्रुवंनसीताम्रियतइतिपाठः क्वचित् तत्रदेतुःयथेतियतइत्यर्थः २ स्वशीलंपाति
वंस प्रतिदुष्टकर्मणा प्रतीपदुष्टकर्मस्वतेनसकलसज्जनानर्थकारिणेत्यर्थः आर्यपथे आर्याणांपतिव्रतानांमार्गे २

102 रावणस्यानुरागात्सीतावधदोषाज्ञातद्वधेः प्रभुभावपिस्वयमेवभयान्नष्टास्त्याह विरूपेति दीर्घाणिविरूपाणिदर्शनानियासांता
दीर्घपदेनकर्मधारयोवा राक्षसराजयोषितः तदाज्ञाकारिणीः ४ पौरुषंसमुद्रलंघनरूपपराक्रमसाध्यप्रयोजनं कालंवि
स्मृत्यसुग्रीवकृतंकालमतिक्रम्यसुग्रीवसमीपंगम्यतेययासागतिः मानास्तितत्रदेव: सतीवोगति ५९ यस्त्वसुग्रीवसमी

विरूपरूपाविकृताविवर्णामहाननादीर्घविरूपदर्शनाः समीक्षितावाक्षसराजयोषि
तोभयाद्धिनष्टाजनकेश्वरात्मजा ४ सीतामदृष्ट्वाह्यनवाप्यपौरुषंविहृत्यकालंसहवा
नरैश्चिरं नमेऽस्तिसुग्रीवसमीपगागतिः सतीक्ष्णदंडोबलवांश्चवानरः ५ दृष्टमंतःपुरंस
र्वंदृष्टारावणयोषिता नसीताहृश्यतेसाध्वीवृथाजातोममश्रमः ६ किंनुमावानराःस
र्वेगतंवक्ष्यंतिसंगताः गत्वातत्रत्वयावीरकिंकृतंतद्वदस्वनः ७ अदृष्ट्वाकिंप्रवक्ष्यामितामहं
जनकात्मजां ध्रुवंप्रायमुपासिष्येकालस्यव्यतिवर्तनः किंवावक्ष्यतिवृद्धश्चजांववानंगदश्चसः

पगमनवार्ताप्यंगदादिसमीपगमनमपिदुर्लभमित्याह किंन्विति किंवक्ष्यंतीतिचिंतांकृत्वापुनर्विचार्ययद्वक्ष्यंतित्स्वयमेवानु
वदति गत्वेत्यादि वदस्वइतिवक्ष्यंतीत्यर्थः ७ किंप्रवक्ष्यामितान्प्रतीतिशेषः नकिमपीत्यर्थः यदेवमतोध्रुवमिति कालस्यसु
ग्रीवकल्पितस्यव्यतिवर्तने अतिक्रमे ८ किंवावक्ष्यतिमांयिकरिष्यतीत्यर्थः समागतामिलिताश्चतेवानराश्चकिंकरिष्यंति ९

ॐ
रा॰ वा॰
टी॰ सु॰
५२

103 एवं हनूमान्निर्विद्य पुनरुत्साहमवलंब्याह अनिर्वेद इति निर्वेदः कारणाग्रामप्रवृत्तिर्वैमुख्यं तदभावः उत्साहः १० यत्कर्म स
करोति तत्कर्म सफलं करोति ११ अनिर्वेदकरं उत्साहजननं यत्नं चित्तस्थैर्यं चेष्टे करोमि १२।१३ निष्कुटोन्तरथ्याः गृहा
रामध्यगतावीथ्यः विमानानि पुष्पकादीनि १४ भूमीगृहान्भूविलगृहान् गृहातिगृहकाः गृहोपरिगृहाः अतिकतकः

अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखं भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः १०
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः करोति सफलं जंतोः कर्म यच्च करोति सः ११
तस्मादनिर्वेदकरं यत्नं चेष्टेहमुत्तमम् अदृष्टांश्च विचेष्यामि देशान्रावणपालितान् १२
आपानशाला विचितास्तथा पुष्पगृहाणि च चित्रशालाश्च विचिता भूयः क्रीडागृहा
णि च निष्कुटांतररथ्याश्च विमानानि च सर्वशः इति संचिंत्य भूयोपि विचेतुमुपचक्रमे
भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः पुनः १५
अपावृण्वंश्च द्वाराणि कपाटान्यवघट्टयन् प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्निव १६

गृहान्नीत्यानतिदूरे स्वैरविहारार्थं निर्मितगृहाः अन्य एव इति तीर्थः विचिन्वेतुमुपचक्रमे इत्यन्वकर्षः उत्पतन् उन्नमारोहन् निपतन्
नमवरोहः १५ निष्पतनं निष्क्रमणं अवघट्टनं संवरणं १६

104 पंसकपिर्नजगामसमाद्दशाङ्गुलंगुलमात्रोप्यवकाशोनविद्यते १७ प्राकारांतरवीथ्यः प्राकारमध्यवर्तिमंत्रिकुमारादिगृहवीथ्यः चैत्यस्थव
घ्ययवर्तिहृदः सुभ्राः गताः १८ १९ राघवनंदिनीरामप्रिया २० २१ प्रथमनागकन्यावलाहृताअन्येनेनवदीकृत्वानांग्रहः

+हनूम४

सर्वमप्यवकाशंसविचचारमहाकपिः चतुरंगुलमात्रोपिनावकाशः सविद्यते राव
णांतःपुरेतस्मिनयंकपिर्नजगामसः १७ प्रकारांतरवीथ्यश्चवेदिकाश्चैत्यसंश्रयः श्व
भ्राश्चपुष्करिण्यश्चसर्वंतेनावलोकितं राक्षस्योविविधाकाराविरूपाविकृतास्तथा
दृष्टाहनूमताततत्रनतुसाजनकात्मजा १९ रूपेणाप्रतिमालोकेपराविद्याधरस्त्रियः दृष्टाह
नूमतातत्रनतुराघवनंदिनी २० नागकन्यावरारोहाः पूर्णचंद्रनिभाननाः दृष्टाहनूम
तातत्रनतुसाजनकात्मजा प्रमथ्यराक्षसेंद्रेणनागकन्याबलाद्धृताः दृष्टाहनुमता
तत्रनसाजनकनंदिनी सोपश्यत्तांमहाबाहुः पश्यंश्चान्याश्चवरस्त्रियः विषसादमहाबा
हुर्हनूमान्मारुतात्मजः २३ उद्योगंवानरेंद्राणांप्लवनंसागरस्यच व्यर्थंवीक्ष्यानिलसुत
श्चिंतापुनरुपागतः २४

एणांसर्वेत्तरूपाणांनागकन्यानांयद्दर्शनमतोनपुनरुक्तिः २२ २३ २४

श्री रा वा सुं टी ५३

105 अवतीर्यविमानाच्चेति पुनरावृत्त्यावरूढचेतनार्थः विमाने प्रवेशेन तत्सर्वदर्शनमिति तत्त्वं २५ भिन्नमानः इत्यार्षे रामायणे सुंदरकां
डे द्वादशः सर्गः १२ वेगवान्हनूमान्विमानात्प्राकारं संक्रम्य घनान्तरे यथा विद्युत्सा शोभा आसीत्तथासीत् प्राकारस्थं इन्द्रनीलकृततल

अवतीर्यविमानाच्चहनूमान्मारुतात्मजः चिंतामुपजगामाथशोकोपहतचेतनः २५
इत्यार्षे रामायणे सुंदरकांडे द्वादशः सर्गः १२ विमानात्तुसुसंक्रम्यप्राकारंहरियूथपः
हनूमान्वेगवानासीद्यथाविद्युद्घनांतरे १ संपरिक्रम्यहनुमान्रावणस्यनिवेशनात्
अदृष्ट्वाजानकींसीतामब्रवीद्वचनंकपिः २ भूयिष्ठंलोलितालंकारामस्यचरताप्रियं
नहिपश्यामिवैदेहींसीतांसर्वांगशोभनां पल्वलानितटाकानिसरांसिसरितस्तथा
नद्योनूपवनान्ताश्चदुर्गाश्चधरणीधराः लोलितावसुधासर्वानचपश्यामिजानकीं
इहसंपातिनासीतारावणस्यनिवेशने आख्यातागृध्रराजेननचसादृश्यतेनुकिं ५

मनेन तथन्याने । रावणस्यनिवेशनात्तद्गृहात्संपरिक्रम्य पुनः परिक्रमणेन दृष्ट्वा जानकीं चादृष्ट्वा अब्रवीत् आत्मनैवेति वोध्यं २ भूयि
ष्ठं लोलिता वहुशो निविष्टा ३।४ ननु तदुपलब्धिप्रमाणादभावनिश्चयः स्यात्तत्राह इहेति रावणनिवेशनमेवाख्यातात् इह चक्षुश्रमाण

106 बहुप्रकारं चिंतयति किंत्विति एवं हंसामंदोदरीसौंदर्यादिगुणैः पुनः सीतालेन संभाव्यते निश्चामकवाक्यं रावणेन बलात् हृताविव
शा सीता उपतिष्ठेत रावणमिति शेषः रावणोऽप्यव्यभिचारि पिपाठे तेन यथा कृतमेवद्दं किंतु ऊत्सितं तु यतः सा मैथिली सीता ल्लाग लय
इति नस्येनाचोनिजा वैदेही न गम्य शस्त विदेह वंश संभूता जनककात्मजा ब्रह्मवित्पुत्री ६ नत्वदर्शने ऊत स्तत्र देहेत्वनेभ्रदत्तेदिशति

किंतु सीताथ वैदेही मैथिली जनकात्मजा उपतिष्ठेत विवशा रावणेन हृता बलात् ६
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः विभ्यतो रामबाणानामंतरा पतिता भवेत् ७
अथवा ह्रियमाणायाः पथि सिद्धनिषेविते मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरं ८
रावणस्योरुवेगेन भुजाभ्यां पीडितेन च तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया
उपर्युपरि सा नूनं सागरं क्रमतस्तदा विचेष्टमाना पतिता समुद्रे जनकात्मजा १० अ
हो क्षुद्रेण चानेन रक्षंती शीलमात्मनः अबंधुर्भक्षिता सीता रावणेन तपस्विनी ॥

पतेपतत्वात् अः स्वातिशयात्संपाति वचनविस्मरणमूलकः विभ्यतः करात्भ्रष्टेति शेषः रामबाणानां आघातादिति शेषः प्रेक्ष्यैवा
रामपरोक्षं तथा भयायोगात् पतितं नरमथवेति हृदयं पतितं मन उत्क्रांतं मनउत्क्रमणस्यैव मरणत्वात् ८ पीडितेन पीडनेन ९
विचेष्टमाना विलुठंती १० ननु सर्वं सेनदसभांतरावणेन सर्वापापरहितं हरणस्यैपत्करत्वादतः पश्चात्तरमाह अहोइति अबंधवे

श्री
रा वा
सुं टी
५५

107 ननु बह्वभर्तृणां सामग्रीवत्त्वादनुरागवत्त्वाच्च तेन भर्तृणामसंभावितमनुग्राह्य ध्रुवमेवेति सापत्न्यदुःखादिति भावः ॥२॥ एतद्वयं श्लो
कद्वयं संहृत्तां चेद्रेत्यादि श्लोमिति कतकः ॥३॥ ननु सपत्नीभिरप्यशोकं भर्तृणां रावणेन स्वभोगार्थमानीतत्वादत आह ध्रुवं वेति निहिता

ध्रुवं राक्षसेंद्रस्य पत्नीभिरसितेक्षणा प्रहृष्टाहृष्टभावाभिर्नंदिता सा भविष्यति ॥२॥
सहृत्ता च वृद्धशीतिसंपन्नापत्रनिभेक्षणं रामस्य ध्यायती वक्त्रं पचन्द्रप्रणागता हा
रामलक्ष्मणेत्येव हायोध्येति च भामिनी विलप्य बलवद्वैदेही न्यस्तदेहा भविष्यति
ध्रुवं वा निहता मन्ये रावणस्य निवेशने भृशं लालप्यते बाला पंजरस्थेव शारिका
जनकस्य कुले जाता रामपत्नी सुमध्यमा कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥४॥

एतन्मयास्यापिताऽऽतिमन्ये नायमपि पत्न्योऽधिकस्तत्राह एवमपि सा बाला पंजरस्था शारिकेव भृशं मुहुर्मुहुः रामेति लालप्यते लालप्ये
तेन च तन्नाह दृश्यते इति भावः ॥३॥ ननु नहि रावणसमीप एव भवेत् संपातिवचनप्रामाण्यात् मया तत्सम्यक् नान्विष्टमित्याशंक्याह

५५ जनकस्येति तस्मादेतत्पद्यद्वयमितिभावः ॥४॥

108 नन्वनेनविज्ञानेणात्वंयथावभूतंनिवेद्यतांतत्राह विनष्टेति अस्यकाचिद्वर्ततइतिशेषः एतस्याअदर्शनइतिसाराहष्टासतीक्वविदस्तीति
वक्तुमशक्यंसर्वतोनिष्टत्वात् प्रनष्टाप्रगतेनष्टमदर्शनंयस्याः साहष्टेत्यर्थः एतदोपिनवक्तुमशक्यमहष्टत्वात् एवमस्तेनस्यावि
वक्तुनशक्यंतत्साधकहष्टतरप्रमाणाभावात् तस्माद्रामस्याग्रेकिमपिवक्तुंनशक्यं हृष्णदेशेमायया: दर्शनंविनाशः अह
ष्णदेशेऽवस्थापनंप्रणाशइतिनतीर्थः ।५ तदेवस्पष्टयति निवेद्यमानेति नहृष्टेति निवेद्यमानेदोषः वक्ष्यमाणरामप्राणात्या

विनष्टावाप्रनष्टावामृतावाजनकात्मजा रामस्यप्रियभार्यस्यनविवेदयितुंक्षमं ।५
निवेद्यमानेदोषःस्याद्दोषःस्यादनिवेदने कथन्नुखलुकर्तव्यंविषमंप्रतिभातिमे ।६
अस्मिन्नेवंगतेकार्येप्राप्तकालक्षमंचकिं भवेदितिमतिंभूयोहनुमान्प्रविचारयन् ।७
यदिसीतामहष्टाहंवानरेंद्रपुरीमितः गमिष्यामिततःकोमेपुरुषार्थोभविष्यति ।८
ममेदंलंघनंव्यर्थंसागरस्यभविष्यति प्रवेशश्चैवलंकायाराक्षसानांचदर्शनं ।९

गरूपः अनिवेदनेस्वामिवंचनावरूपोदोषः तस्मान्निवेदनरूपमुभयमपिविषयंमंत्रवनहृष्टेयंप्रतिभाति ।६ एतदनंतरंक
विवाक्यमस्मिन्निितिकार्येएवंगतेसतिउनिरूपेसतीत्यर्थः प्राप्तकालकालोचितं किंक्षमंकिंवक्तुयुक्तंभवेदितिभूयोमतिंद्विषये
एतंविचारयन्नभूदितिशेषः ।७ विचारस्वरूपमेवप्रपंचयति यदीति कोभविष्यतिनकोपीत्यर्थः ।८

श्री
रा वा
सं टी
५५

109 वक्ष्यतिग्रसाभेवववक्ष्यतीत्यर्थः २० नहृष्टेनाप्रियंयदिवक्ष्यामिनततस्तच्छ्रवणानंतरं २१ परुषेकर्णकठोरेंग्रतएवदारुणंभयंकरीति।

किंवावक्ष्यतिसुग्रीवोहरयोवापिसंगताः किंष्किंधामनुसंप्राप्तेतौदशरथात्मजौ २० गत्वातु
यदिकाकुत्स्थंवक्ष्यामिपरुषंवचः नदृष्टेतिमयासीतातनस्त्यक्ष्यतिजीवितं २१ परुषंदारुणं
नीहंतीक्रूरमिंद्रियतापनं सीतानिमित्तंवाक्यंश्रुत्वासनभविष्यति २२ तंतुकृच्छ्रंगतंदृ
ष्ट्वापंचत्वगतमानसं भृशानुरक्तोमेधावीनभविष्यतिलक्ष्मणः २३ विनष्टौभ्रातरौश्रुत्वा
भरतोपिमरिष्यति भरतंचमृतंदृष्ट्वाशत्रुघ्नोनभविष्यति २४ पुत्रान्मृतान्समीक्ष्याथनभ
विष्यंतिमातरः कौसल्याचसुमित्राचकैकेयीचनसंशयः २५ कृतज्ञःसत्यसंधश्चसुग्रीवः
प्लवगाधिपः रामंतथागतंदृष्ट्वाततस्त्यक्ष्यतिजीवितं २६ दुर्मनाव्यथितादीनानिरानंदा
तपस्विनी पीडिताभर्तृशोकेनरुमात्यक्ष्यतिजीवितं २७ वालिजेनतुदुःखेनपीडिताशोक
कर्शिता पंचत्वमागताराज्ञीतारापिनभविष्यति २८ मातापित्रोर्विनाशेनसुग्रीवव्यसने
नच कुमारोप्यंगदस्तस्माद्विजहिष्यतिजीवितं २९ तापमममर्पक्रूरमुग्रं इंद्रियाणांतापनं संतापकं
सीतानिमित्तंसीताविषयं सरामः २२ २४ २५ ततःद्विविधःस्थिरामदर्शनात् २० वालिमरणजेनपंचत्वमागतापंचत्वंप्राप्स्यतिनिष्ठ

पद्मनि ५८ तज्जलितितिं ५८

110 २ यशस्विना कपिनाथेन सांत्वादिभिर्लालिताः प्राणांस्त्यक्ष्यंति २१ निरोधेषु गृहादिसंहननदेशेषु २२ रुग्णदारा इत्यादेः कपिकुंज
रा इति विशेष्य २३ शस्त्रशस्त्रयानप्रचरिष्यंति २४ २५ २६ प्रगच्छगतिगमनरहिते आशया सीता हृता तत्र वणशन्याया या परिपीते

भर्त्रानेन तु दुःखेन ह्यभिभूता वनौकसः पिंडांस्यभिह निष्प्रांतिन लेखैर्हिष्टिभिरेव च २० सांत्वे
नानुप्रदानेन मानेन च यशस्विना लालिताः कपिनाथेन प्राणांस्त्यक्ष्यंति वानराः न वनेषु न शै
लेषु न निरोधेषु वा पुनः क्रीडामनुभविष्यंति समेत्य कपिकुंजराः २१ सपुत्रदारा सामात्या भर्तृव्य
सनपीडिता शैलाग्रेभ्यः पतिष्यंति समेषु विषमेषु च २२ विषमुद्बंधनं वापि प्रवेशं ज्वलनस्य वा
उपवासमथो शस्त्रं प्रचरिष्यंति वानराः २४ घोरमारोदनं मन्ये गते मयि भविष्यति इक्ष्वाकुकु
लनाशाच्च नाशाच्चैव वनौकसां सोहं नैव गमिष्यामि किष्किंधां नगरीमितः न हि शक्ष्याम्यहं द्र
ष्टुं सुग्रीवं मैथिलीं विना मय्यगच्छति चेहस्थे धर्मात्मानो महारथौ आशया तौ धरिष्येते वान
राश्च मनस्विनः २७ हस्तादानो मुखादानो नियतो वृक्षमूलिकः वानप्रस्थो भविष्यामि ह्यदृष्ट्वा
जनकात्मजां सागरानूपजे देशे बहुमूलफलो

आशा गतिरिति शेषः २७ हस्तादानः हस्तपतितफलादिग्राहकस्त
भोजीति यावत् एवं मुखादानो मुखपतितभोजी नियतो नियतेंद्रियः वृक्षमूलिको वृक्षमूलनिवासी २८ आरण्यीस्वतमाप्रिम २९

श्री
वा रा
सु टी
५९

उपविष्टस्य प्रायमुपविष्टस्य लिंगिनं शरणालिंगने लिंगि शरीरं वनं वा आत्मानं साधयिष्यतः शरीरिणा वियोजयिष्यतः लिंगिनी
मितिपाठे प्राणालिंगिनी चिंतावेतनामित्यर्थः ५० इदं वहुमाणमापः अप्स्वित्यर्थः ५१ सीतामपश्यतो मम ये प्राप्सितो यशः संपादि
कामरतस्य ख्यातियशः सुजातमूला सुजातकारणवती कीर्तिरूपा मालाजीवितः साकीर्तिः चिररात्रेयेत्यव्ययं चिरायेत्यर्थः चि
रात्रयया आत्यंतिकलयं गतेत्यर्थः तीर्थस्तु चिररात्रीयममेतिपाठे अल्पसीतान्वेषणोपयुक्तत्वेन शोभनमूला सीतान्वेषणस

उपविष्टस्यवासम्यक्लिंगिनंसाधयिष्यतः शरीरंभक्षयिष्यंतिवायसाःश्वापदानिव ५०
इदमहर्षिभिर्दृष्टंनिर्याणमितिमेमतिः सम्यगापःप्रवेक्ष्यामिनचेत्पश्यामिजानकीं ५१
सुजातमूलासुभगाकीर्तिमालायशस्विनी प्रभग्नाचिररात्रायममसीतामपश्यतः ५२
तापसोवाभविष्यामिनियतोवृक्षमूलिकः नेतःप्रतिगमिष्यामितामदृष्ट्वासितेक्षणां ५३

कार्योपादकवंदिकया सुभगा सीतान्वेषणसहकारिणीति सर्वैः क्रियमाणा कीर्तिस्समालायस्याः सेयं चिररात्री चिरकालविशि।
ष्टादीर्घारात्रिः स्वस्थलंकाप्रवेशरात्रिप्रभग्नानिष्फलातेत्यर्थः अनेन रामकार्यसहकारिणीत्वेच्छया रात्रिरप्यात्मानं वर्धितवती
ति सूच्यत इत्याह ५२ तापसः जटाकाषायादिचिह्नीयतिः ५३

112 ग्राहशागमनेनेनिश्चितमासन्नंदोषमाह यदीति नभविष्यति नजीविष्यति ५५ एवमसमनेनेनिश्चितेमरणाजीवितयोःकिंश्रे
यस्तत्राह विनाशइति दोषाःवहवःप्रागुक्ताःचिरायापिमदागमनेसीताविनाशान्तिश्रृयेनरामादयामस्तुवेवग्रात्मघातादयश्च
जीवंस्तुममात्माभद्रकंप्राप्नोति वक्ष्यमाणानाविपोयायाश्रयनेनतस्मात्प्राणान्धारिष्यामियतोमयिजीवतिसतिसंगमःस्याव

यदिनुप्रतिगच्छामीमितामनधिगम्यतां अंगदःसहितःसर्वैर्वानरैर्नभविष्यति ५५
विनाशोवहुदोषोजीवन्प्राप्नोतिभद्रकं तस्मात्प्राणान्धारिष्यामिध्रुवोजीवतिसंगमः ५५
एवंवहुविधंदुःखंमनसाधारयन्मुहुः नाध्यगच्छत्तदापारंशोकस्यकपिकुंजरः ५६
ततोविक्रमसंपन्नःधैर्यवान्कपिकुंजरः रावणंवावधिष्यामिदशग्रीवंमहावलः ५७
काममस्तुहृतासीताप्रत्याचीर्णाभविष्यति ५८

संगमोरामादीनांध्रुवःसंभावितइत्यर्थः काव्यलिंगमत्रालंकारः तीर्थस्तुजीवितंसंगमइतिपाठंकल्पयामास ५५ इतःपरंक
विवाक्य एवमित्यादि ५६ कपिकुंजरस्तस्यइतिचिंतयामासेतिशेषः ध्रुवोजीवितिसंगमइत्युक्तेराशयंहनुमानाह रावणंवे
ति ५७ ननुरावणवधेनकिंसाधितंस्यात्तत्राह प्रत्याचीर्णावैरनिर्यातनांकृतंभविष्यतितीर्थः एवंकृत्वागमनेसर्वेषांसुखमित्या

श्री 113 जनमयाहृतश्चेतीदं वचो विषमनीयं स्यात्सीतालाभेन रामसुखानि हंतीत्युक्तं ततः पक्षांतरमथवेति एवं सति तल्लाभोपि संभाव्यत इत्या
वा.रा. शयाः ४९ रावणस्य वधानयनेपि सीतामात्मसाद्भवतीति तदलाभप्रतीतेः ततः शोकपरीतात्मा पक्षांतरं चिंतयामास यावत्सीतामि
टी.सुं. ति वर्तमानसामीप्ये लट् तावदत्रावस्थितेन मया पुनः पुनरन्वेषणे असफले सति अत आह संपातिवचनादिति तद्वचनविश्वासा
५०

अथवैनं समुत्क्षिप्य उपर्युपरि सागरं रामायोपहरिष्यामि पशुं पशुपतेरिव ४९ इति चिं
तां समापन्नः सीतामनधिगम्य तां ध्यानशोकपरीतात्मा चिंतयामास वानरः ५० यावत्सीतां
न पश्यामि रामपत्नीं यशस्विनीं तावदेतां पुरीं लंकां विचिनोमि पुनः पुनः ५१ संपातिवचना
च्चापि रामं यद्यानयाम्यहं अपश्यन् राघवो भार्यां निर्दहेत्सर्ववानरान् ५२ इहैव नियताहारो
वत्स्यामि नियतेंद्रियः न मत्कृते विनश्येयुः सर्वे ते नरवानराः ५३

देवेत्यर्थः तत्र तत्र दशरोदात्रिविश्मितं शमार्गानंतु तद्वचनविश्वासादेव रामं प्रति सीतात्रास्तीति लंकाशीघ्रं संप्रवाज्ञातेषः किमनेन
कालविलंबेनेत्यत्राह रामं यदीति रावणोहृतेपि मयैव रामेणापि तद्दर्शनेन रामः सर्ववानरनाशं करिष्यतीति भावः ५२ तस्मा
दिहैव नियताहारो वत्स्यामीति विशेषयुः सीतामदृष्ट्वा मद्गमनांतरमिति भावः ५३

114 एवंचिंताकुलांनविष्टदेशं दृष्ट्वासंपातिवचनात्तत्रसीतास्थितिंनिश्चित्यानशनाद्अशोकेति ५४ तत्राप्यशोकवनिकापातदर्शनप्रति-
बंधकउरितत्पायदेवान्नमस्कृत्यसंपादयति वसूनिति चात्रामादीन् ५५ तपस्विनेसिद्धीमिव तपःफलमिवतपःप्रसन्नादे

अशोकवनिकाचापिमहतीयंमहाद्रुमा इमामधिगमिष्यामिनहीयंविचितामया ५४
वसूनरुद्रांस्तथादित्यानश्विनौमरुतोपिच नमस्कृत्वागमिष्यामिरक्षसांशोकवर्धनः ५५
जित्वातुराक्षसान्देवीमिक्ष्वाकुकुलनंदिनी संप्रदास्यामिरामायसिद्धीमिवतपस्विने ५६
समुहूर्तमिवध्यात्वाचिंताविग्रथितेंद्रियः उदतिष्ठन्महाबाहुर्हनूमान्मारुतात्मजः ५७
नमोस्त्वरामायसलक्ष्मणायदेव्यैचतस्यैजनकात्मजायै नमोस्तरुद्रेंद्रयमानिलेभ्योनमो
स्त्वचंद्राग्निमरुद्गणेभ्यः ५८

वनेनिशेषः ५६ चिंतायाविग्रथितानिसंबद्धानिव्याकुलानिइंद्रियाणियस्यसः ५७ प्रतिज्ञातंनमस्कारमनुतिष्ठति नमोस्त्वरा
मायेति अनेनरामस्यभगवदवतारत्वंसूचितं रुद्रादिनमस्कारेणविराजोभगवतोनतिः ५८

115 स्वामित्वात्सर्वेषां लालसग्रीवजातिः अशोकवनिकां गतः मनसेति शेषः अशोकवनिकां प्रतीति पाठे यत्नः तथाहारः उत्तरं समनन्तरकर्तव्य
कृते ५९ ६० चिंताहेतुं दर्शयति ध्रुवमिति वनाकुलकाननाकुला संस्कारः सेचनसेकादिरूपहृद्यसंस्कारः अत्र ध्रुवं रक्षोबहुलेत्यन्वयः चाद्याः

स तेभ्यस्तु नमस्कृत्वा सुग्रीवाय च मारुतिः दिशः सर्वाः समालोक्य सो ऽशोकवनिकां प्रति ५९ स
गत्वा मनसा पूर्वमशोकवनिकां शुभां उत्तरं चिंतयामास वानरो मारुतात्मजः ध्रुवं तु रक्षोबहुला भ
विष्यति वनाकुला अशोकवनिका पुण्या सर्वसंस्कारसंस्कृता ६१ रक्षिणश्चात्र विहिता नूनं रक्षं
ति पादपान् भगवानपि विश्वात्मा नातिक्षोभं प्रवायति ६२ संक्षिप्तोयं मयात्मा च रामार्थे रावण
स्य च सिद्धिं दिशंतु मे सर्वे देवाः सर्षिगणास्त्विह ६३ ब्रह्मा स्वयंभूर्भगवान्देवाश्चैव तपस्विनः
सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ६४ वरुणः पाशहस्तश्च सोमादित्यौ तथैव च
अश्विनौ च महात्मानौ मरुतः सर्व एव च ६५

स्तः सूचितः अन्यथा तत्प्रकाशेन निश्चयः प्रवस्यात् ६१ अत्राशोकवनिकायां विहिता नियुक्ताः विश्वात्मा वायुः ६२ मयात्मा शरीरमि-
त्यर्थः रावणस्यार्थे इत्यनुकर्षः रावणकर्तृकदर्शनपरिहारायेत्यर्थः ६३ पुनः सर्वात्मना कार्यसिद्धये स्मरति ब्रह्मेत्यादि देवा भ
गवद्रूपदेवाः तानेव दर्शयति अग्निश्चेत्यादि सिद्धिं दिशन्त्वित्यन्वयः ६४ ६५

116 भूतानांप्रभुःप्रजापतिः दास्यंतितेषामप्यस्यार्थसेष्टत्वादितिभावः पूर्वंप्रार्थनाउक्तांनीत्वतत्रिस्मयः पथिगोचराश्चदृष्टाअपिपथि
मार्गगोचरत्वेनसिद्धिदत्वेनशास्त्रैःदृष्टाअनुक्ताअपिनादृष्टाप्युवेतेपिसिद्धिंदास्यंति ९९ अच्छिन्नतानासाग्रस्मितततस्माउदेवियोगवशा
त् प्रवणामनवद्यं ९० सदारुणोणपालंकृतवेषधारीविघ्नसनीयवेषधारिनेन ९८ मुहुश्चमानः इत्यार्षरामायणेसुंदरकांडेत्रयोद

सिद्धिंसर्वाणिभूतानिभूतानांचैवयःप्रभुः दास्यंतिममयेचान्येप्यदृष्टाःपथिगोचराः ९९
नेत्रभ्रमस्पाडुरदंतमव्रणं शुचिस्मितंपद्मपलाशलोचनं द्रक्ष्येकदाहंवदनंकदात्वहंश
मत्तताराधिपतुल्यवर्चसं ९० ह्रीदेणाहीनेनतुर्थंसमन्वितां सुदारुणालंकृतवेषधारिणा
बलाभिभूताप्यबलातपस्विनी कथंत्वमेदृष्टिपथेद्यसाभवेत् ९८ इत्यार्षसुंदरकांडेत्रयोदशः १३
समहूर्तमिवध्यात्वामनसाचाधिगम्यतां अवप्लुतोमहातेजाःप्राकारंतस्यवेश्मनः १
संहृष्टसर्वांगःप्रकारस्थोमहाकपिः पुष्पिताग्रान्वसंतादौददर्शविविधान्द्रुमान् २

शः सर्गः १३ ध्यात्वाउत्प्लवनंनिश्चित्य तांसीतांमनसाधिगम्य ध्यात्वा तस्यरावणस्यवेश्मप्राकारात प्राकारंवनप्राकारं अ
वप्लुतः उत्प्लवनेप्राप्नः १ संहृष्टसर्वांगःपुलकितसर्वांगः वसंतादौवसंतादिसर्वर्तुभिसंनिहितैःपुष्पैःपुष्पिताग्रान् २

प्री
रा वा
सुं टी
५९

117 भगवानत्युद्दालकान् उद्दालकाः वृक्षविशेषाः नागवृक्षा नागकेसरवृक्षाः कपिमुखाः कपिमुखाकारफलवन्तः वृक्षविशेषाणामतत् ज्यामुक्तः रामेण
तिशेषः ४ विचित्रां तां विचित्रयंतां राजतैः रजतादिसंस्कृतैस्तद्वर्णैर्वा ५ चित्रकाननां चित्रद्रुमखंडोपेतां उदितादित्यसंकाशां शाखापुष्पैरिति
शेषः ६ पुष्पोपगफलोपगैः पुष्पफलयुतैः ७ कालेसर्वस्मिन्नपि प्रहृष्टमनुजां मृगविकासादिलिंगकपिंजनो मृगादीनां मदे

सालानशोकान्भव्यांश्च चंपकांश्च सुपुष्पितान् उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि तथा
म्रवनसंछन्नांल्लताशतसमावृतां ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकां ४ स प्रविश्य विचि
त्रां तां विहगैरभिनादितां राजतैः कांचनैश्चैव पादपैः सर्वतो वृतां विहगैर्मृगसंघैश्च विचित्रां चित्रका
ननां उदितादित्यसंकाशां ददर्श हनुमान्बली ६ वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः
कोकिलैर्भृंगराजैश्च मत्तैर्नित्यनिषेवितां प्रहृष्टमनुजां काले मृगपक्षिमदाकुलां मत्तबर्हिण
संघुष्टां नानाद्विजगणायुतां मार्गमाणो वरारोहां राजपुत्रीमनिंदितां सुखप्रसुप्तान्विहगान्बो
धयामास वानरः उत्पतद्भिर्द्विजगणैः पक्षैर्वातैः समाहताः अनेकवर्णा विविधा मुमुचुः पु
ष्पवृष्टयः १०

नाकुलमनिंदितां प्रहृष्टमनुजे काले शत्रियद्वयेसामान्यं तयाठे नाहं ज्ञातेवसंतशागभवेनत्वं विदितेकालेश्म
धेः बोधयामास शाखाचंक्रमणेनेतिभावः ९ पक्षैरुत्पतद्भिः इत्यन्वयः समाहताः वृक्षाइतिशेषः पुष्पवृष्टयः पुष्पवृष्टीः १०

118 ॥ सर्वाभिद्रावंतमिति संधिरार्षः वसंत इति मेनिरे इति अन्ये सोऽद्रवनेः शाखाप्रवेशान्वात वसंते पवहृन्तसंचारोचितं कपिन्रूपमास्था
यवर्तनीति मेनिरे इत्यर्थः पतेन दृष्टेणातस्मिन विमतिनिवृत्तिरीश्वरानुग्रहादिति सूचितं ॥२॥३॥ बहुप्रकारं कपिना बहुकंपिताः ॥४

पुष्पावकीर्णः शुशुभे हनूमान्मारुतात्मजः अशोकवनिकामध्ये यथा पुष्पमयो गिरिः
दिशः सर्वाभिधावंतं वृक्षखंडगतं कपिं दृष्ट्वा सर्वाणि भूतानि वसंत इति मेनिरे ॥२॥ वृ
क्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः रराज वसुधा तत्र प्रमदेव विभूषिता ॥३॥
तरस्विना तेन तरवस्तरसा बहुकंपिताः कुसुमानि विचित्राणि ससृजुः कपिना तदा
निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥५॥
हनूमता वेगवता कंपितास्ते नगोत्तमाः पुष्पपत्रफलान्याशु मुमुचुः फलशालिनः ॥६॥
विहंगसंघैर्हीनास्ते स्कंधमात्राश्रया द्रुमाः बभूवुरगमाः सर्वे मारुतेन विनिर्धुताः ॥७॥

निर्धूतपत्राणि शिखराणि येषां ते निर्धूतपत्रशिखराः धूर्ताः ॥५॥६॥ स्कंधमात्रस्याश्रयाः न तु पुष्पादीनां अत एव अगमाः अगसेव्याः मारुतेन तत्सु
तेन हनुमता विनिर्धुता इति ह्रस्वश्चार्षः इति कतकः तत्र ह्रस्वस्यापि भंजः सत्वात् ॥७॥

श्री वा रा टी सुं ६

119 वर्णिकाविलेपनंनिपीतःशुभदंतयुक्तःओष्ठोयस्याः १८ लांगूलहस्तैरित्येकवचनाभावआर्षः १९ मारुतजालानि २० उच्यमान
विशिष्टावापीर्ददर्श श्लोकपंचकंवाक्यं २२ मुक्ताप्रवालरूपापवित्रसिकतायासां अंतरकुट्टिमाः अभ्यंतरनिबद्धभूमियुता २३ नत्य

विधूतकेशीयुवतिर्यथामृदितवर्णिका निपीतशुभदंतोष्ठीनखैर्दंतैश्चविक्षता १८
तथालांगूलहस्तैश्चचरणाभ्यांचमर्दिता तथैवाशोकवनिकाप्रभग्नवनपादपा १९
महालतानांदामानिव्यधमत्तरसाकपिः यथाप्रावृषिविंध्यस्यमेघजालानिमारुतः २०
सतत्रमणिभूमीश्चराजतीश्चमनोरमाः तथाकांचनभूमीश्चविचरन्ददृशेकपिः २१
वापीश्चविविधाकाराःपूर्णाःपरमवारिणा महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः २२
मुक्ताप्रवालसिकतास्फाटिकांतरकुट्टिमाः कांचनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः
बुद्धपद्मोत्पलवनाश्चक्रवाकोपशोभिताः नत्यूहरुतसंघुष्टाहंससारसनादिताः २४
दीर्घाभिर्द्रुमयुक्ताभिःसरिद्भिश्चसमंततः अमृतोपमतोयाभिःशिवाभिरुपसंस्कृताः २५

दात्यूहः २४ द्रुमयुक्ताभिः तीरद्रुमयुक्ताभिः वापीनांसरिद्भिरुपसंस्कृतत्वंनित्यंपूर्णजलत्वाय २५

120 संतानः कुसुमाकुलाः गुल्माकुलवनाः कंनेजलं करवीरैः कृतमंतरं गवाक्षस्यानीयं यासांताः २८ ततः वापीदर्शनानंतरं २० जगति
लोके रूपसंदरवस्तुभ्योपि परमसुंदरं तीर्थस्य जगतिपर्वतं जगतीपर्वतमित्यर्थः हृस्वश्चार्षः स्वत्पर्वतमिति यावदिति व्याव
तागाउपेद्यपव २८ निपतितानिः स्रतानां समंतात्सकोपाज्ञन्याय पतितांभूमिशायिना २९ जलेनिपतितायैः पादपैः प

लब्धा शैतैरवृतताः संतानकुसुमाकुला नानागुल्माकुलवनाः करवीरकृतांतराः न
तोदुंथरसंकाशाश्चंद्रशैखरगिरौ विचित्रकूटकूटैश्च सर्वतः परिवारितं शिलाशृंगैर
वृतंतं नानावृक्षसमाकुलं ददर्शाकौपशाहैलोरम्यंजगतिपर्वतं २८ ददर्शचनगानस्मान
दीनिपतितानिकपिः एकादिवसमंतात्पस्थितप्रियस्यपतितानां प्रियां २९ जलेनिपतितायैश्चपाद
पैरूपशोभितां वायमानामिवक्रीडांप्रियवधुभिः ३० पुनराव्हलतोयांचददर्शसमहाकपिः
प्रसन्नामिवकांतस्यकांतांपुनरुपास्थितां ३१ तस्याद्रुरात्सपाश्चिमेनानाद्विजगणायुताः
विगाह्रवशादयः प्रसृतशाखाद्वारेणजलनिपतितायत्वं हुनागां ददर्शाकोपशाहैलोद्रुमात्माकृतनोन्नयः ३२
कृतत्वात्मातेनवा प्रियंप्रतिक्रीडांप्रियसमीपादत्यज्ञंजगामिष प्रियवंधुभिः सखीभिर्वायमाणांप्रमदामिव ३० अतएवकांतस्य
प्रसन्नांपुणांरूपस्थितांकांतामिवपुनराहृततोयां हृद्रायशतिचातातान् पराहृतजलाददर्श ३१ तस्यपर्वतस्यपश्चिमनाः पश्चि

गी॰ प्रकृतिमहोदधिका॰ ३२

श्री
रा॰ वा॰
सुं॰ टी॰
८१

(2) उच्यमानविशेषणां कृत्रिमादीर्घिकामपि ददर्श सिकतशोभितामित्यत्र ह्रस्वआर्ष २३ प्रासादैरिति स्पयुनामितिशेषः २४ येके-
चित्तत्रवृत्तासेसर्वेपिपुष्पफलोभययुता एवेत्यर्थः २५ सच्छत्राः छत्राकारसंस्थानवंतः तेनशीतलच्छायत्वंसूचितं सवितर्-
दीकाः सवेदिकाः सौवर्णवेदिकाः राजाजनादिमहावेदिकोपरिकृतसौवर्णवेदिकाश्चेत्यर्थः लतेत्यर्धमेतेरान्वयि २६ पकां

कृत्रिमांदीर्घिकांचापिपूर्णांशीतेनवारिणा मणिप्रवरसोपानांमुक्तासिकतशोभितां
विविधैर्मृगसंघैश्चविचित्रांचित्रकाननां प्रासादैःसुमहद्भिश्चनिर्मितैर्विश्वकर्मणा
काननैःकृत्रिमैश्चापिसर्वतःसमलंकृतां येकेचित्पादपास्तत्रपुष्पोपगफलोपगाः २५
सच्छत्राःसवितर्दीकाःसर्वेसौवर्णवेदिकाः लताप्रतानैर्बहुभिःपर्णैश्चबहुभिर्वृतां
कांचनींशिंशपामेकांददर्शसमहाकपिः वृतांहेममयीभिस्तुवेदिकाभिःसमंततः
सोपश्यद्भूमिभागांश्चनगप्रस्रवणानिच सुवर्णवृक्षानपरान्ददर्शशिखिसंनिभान्
तेषांद्रुमाणांप्रभयामेरोरिवमहाकपिः अमन्यततदावीरःकांचनोस्मीतिसर्वतः २९

मत्वांहृत्वांतरसंवंधरहितां चकां चनींतवृत्तां शिंशपांपिच्छिलाः प्ररूशिंशपाश्तिकोशः २७-२८ मेरोःप्रभयादिवाकरस्येवतेषांद्रु-
माणांप्रभयाकांचनोस्मीत्यमन्यत कांचनवर्णमात्मशरीरंवीक्षतेस्मेत्यर्थः २९

122 नाल्कांचनानीति किंकिणपल्लेश्रुफलादिवत्सदृनाः अतएवविस्मयमागमत् ५० तेषांतत्स्वर्णमयत्वात् सुपुष्पितायानिति त
रुणाः कोमलाः अंकुराः पल्लवाश्चयेषांतान् दृष्ट्वाविस्मयंप्राप्तइत्यन्वयः तांयस्याः पर्यन्तभूदृष्ट्वा एवंभूतांतामामहत्याश्चिंतयामासेतिशे
षः ५१ रतइति आगतामितिशेषः नदेवस्यप्रयाति रतश्चेतश्चेति ५२ रम्येयमशोकवनिका उदात्मनोरावणस्येवहृढ भवेदाह·

नाल्कांचनान्वृक्षानगाणान्मारुतेनप्रकंपितान् किंकिणीशतनिर्घोषान्दृष्ट्वाविस्मयमागमं
सुपुष्पितायान्रुचिरान्तरुणांकुरपल्लवान् तमारुह्यमहावेगः शिंशुपापर्णसंवृता इतो
द्रक्ष्यामिवैदेहींरामदर्शनलालसां इतश्चेतश्चदुःखार्तांसंपतंतीयदृच्छया ५३ अशोकव
निकाचेयंदृढंरम्यादुरात्मनः चंदनैश्चंपकैश्चापिवकुलैश्चविभूषिता इयंचनलिनीरम्या
द्विजसंघनिषेविता इमांसाराजमहिषीनूनमेष्यतिजानकी ५४ सारामाराजमहिषीरा
घवस्यप्रियासदा वनसंचारकुशलाध्रुवमेष्यतिजानकी अथवामृगशावाक्षीवनः
स्यास्यविचक्षणा वनमेष्यतिसाद्येहराम

मांतरस्यैवंविषयमदसंभवात् ५३ नलिनीचेयंरम्यासावराजमहि
षीत्वाद्रुमस्यप्रियात्वतएमांनलिनींनूनमेष्यति ५४ अरामारामवियुक्ताराजमहिषीत्वादेवरघावनसंचारकुशला ५५ अथ
मेवार्थस्त्रादरेणावृद्धिस्यैर्यार्थेत्रिरावर्त्यते अथचेतिसर्वथेत्यर्थः नतुपदानरामिदंगत्वासंभवात् ५६

सुं 123 अशोकवनिकांतः शिंशपाप्रदेशे सीताया आगमने हेत्वंतरमनुनयति वनेचराणामिति मृगपक्ष्यादीनामित्यर्थः ४८ संध्यादिनरा
रा वा. गाः साथिरूपानुष्ठानकालोयस्य कर्मणस्तत्र मनोयस्याः सा तथा संध्यार्थे संध्याकाले क्रियमाणस्नानाद्यर्थं पूर्वं वृद्धेवात्रापि उक्त
सं टी स्यैवार्थस्यावृत्तिः रात्रिशेषेऽतन्मतोः स्यवचसः प्रवृत्तेः संध्याशब्देनात्र प्रातःकालो विवक्षितः नत्वकर्तव्यस्नानादौचा वस्तीण
९२

रामशोकाभिसंतप्ता सादेवीवामलोचना वनवासरतानित्यमेष्यतेवनचारिणी
वनेचराणांसततंनूनंस्पृहयतेशुभा रामस्यदयिताभार्याजनकस्यसुतासती ४८
संध्याकालमनाः श्यामाध्रुवमेष्यतिजानकी नदींचेमांशुभजलांसंध्यार्थेवरवर्णि
नी तस्याश्चाप्यनुरूपेयमशोकवनिकाशुभा शुभायाःपार्थिवेंद्रस्यपत्नीरामस्यसंमता
यदिजीवतिसादेवीताराधिपनिभानना आगमिष्यतिसावश्यमिमांशीतजलांनदी
मू ५१

मणिविधिकारइति कथं स्त्रीणां संध्यावंदनमिति परास्तं वेदितव्यं किंच सम्यक् भगवत्पानस्यैव संध्यापदार्थत्वेना
स्यैवनत्रास्त्रियाअधिकारः गायत्रीमंत्रेणतदर्थस्मरणपूर्वकध्यानेतु द्विजस्यैवाधिकार इत्यनवद्यं ४९ या रामस्य पत्नी स
मताच यतिव्रतेति सर्वजनस्य तस्याः शुभायाः इयं नदी अशोकवनिका वनानुरूपायोग्या ५०-५१

124 प्रतीक्षमाणः सीतागमनमिति शेषः अवेक्षमाणः इतस्ततोऽवलोकयन् पर्णघने सुपुष्पिते शिंशपावृक्षे निलीनः सन् सर्वं वनं ददर्शे-
त्यन्वयः ५१ रेममानः इत्यार्षे सुन्दरकाण्डे चतुर्दशः सर्गः १४ वीक्षमाणः इतस्ततोऽवलोकयन् तु तस्य शिंशपास्थः मार्गमाणः मै-
थिलीं मार्गमाणो देवतानां दोह? मदीमवेक्षमाणः सर्वां तां अशोकवनिकामन्ववेक्षत १ नाविशिनष्टि सन्तानकलताभिः स

एवं तु मत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेंद्रपत्नीं अवेक्षमाणश्च ददर्श सर्वं
सुपुष्पिते पर्णघने निलीनः ५१ इत्यार्षे चतुर्दशः सर्गः १४ स वीक्षमाणस्तत्रस्थो मार्गमा-
णश्च मैथिलीं अवेक्षमाणश्च महीं सर्वां तामन्ववेक्षत १ संतानकलताभिश्च पादपै-
रुपशोभितां दिव्यगंधरसोपेतां सर्वतः समलंकृतां २ तां स नंदनसंकाशां मृगपक्षि-
भिरावृतां हर्म्यप्रासादसंबाधां कोकिलाकुलनिस्वनां ३ कांचनोत्पलपद्माभिर्वापी-
भिरुपशोभितां बह्वासनकुथोपेतां बहुभूमिगृहायुतां ४ सर्वर्तुकुसुमै रम्यैः फलव-
द्भिश्च पादपैः पुष्पितानामशोकानां श्रिया सूर्योदयप्रभां ५

हितैः पादपैरित्यर्थः २ तां स ददर्शेत्यन्वयः नंदनसंकाशेत्यत्र नंदनशब्दान्नन्दनोपादेयवस्तुमतीं ३ बह्वासनैः कुथैः आस्तरणैश्चो-
पेतां उपर्युपरि भूमियुक्तागृहा बहुभूमिगृहाः ४ सर्वर्तुजकुसुमानि येषां तैः पादपैः पुष्पितानामशोकानां श्रिया सूर्योदयप्रभां उद्यत्सूर्यसमकांतिं ५

श्री
रा वा
सं टी
६३

125 तत्रस्थः शिंशपास्थो मारुतिरशोकपुष्पैः प्रदीप्तामिवोद्देशं तत्रैत्यन्वयः. असकृच्छतशो विनिष्पतद्भिश्चित्रैः पुष्पावतंसकैः प्रवतीमी-
यमानानि येषां तैर्विहगैर्निर्विडशाखामपि निष्पन्नशाखां क्रियमाणां बहुपक्षिपतनविदलितपर्णतया पत्रावदलितशाखामि-
वेत्यर्थः ६ तथा उच्यमानविशेषणैरशोकैः पुष्पभारेण पुष्पसमूहेन जनितान्भारेरत्यतिभारवशादतिप्रवृद्धशाखान्

प्रदीप्तामिव तत्रस्थो मारुतिः समदृश्यत । निष्पन्नशाखां विहगैः क्रियमाणामिवासकृत्
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः । समूलपुष्परचितैरशोकैः शोकनाशनैः ७
पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीं । कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ८
स देशः प्रभया तेषां प्रदीप्त इव सर्वतः । पुन्नागाः सप्तपर्णाश्च चंपकोद्दालकास्तथा
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः । शातकुंभनिभाः केचित्केचिदग्निशिखा-
प्रभाः १० नीलांजननिभाः केचित्तत्राशोकाः सहस्रशः । नन्दनं विबुधोद्यानं चित्रं चैत्ररथं य-
था ११ अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यश्रिया युतं । द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतं
१२

यान्भूमिं स्पृशद्भिः कर्णिकारैः किंशुकैश्च युतः स देशस्तेषां प्रभया प्रदीप्त इव ९ नीलांजननिभा इति पद्यत्रयाः शो-
कानामनेकवर्णपुष्पवत्त्वं सूचितं विबुधोद्यानं तदनंदनं आह्लादकं नंदनं ह्लादकं चैत्ररथं कुबेरवनं यथा चित्रं त-
द्वनं किं ११ तद्भवनमत्यन्तवृत्तमिव अतिक्रम्य वर्तमानं पुष्पज्योतिर्गणायुते १२

६३

126 पुष्पूद्वैपैरन्तशतैः ।३ मृगादिभिःस्वीयैर्नानाविधैःशोदैरप्यंकृतंपर्वविशेषणांकंउद्यानमशोकवतिकांतर्गतंददर्शेत्यनुकर्षः ।४ शैलेंद्रादिमवानन्तस्याप्यदेववर्णितायां ।५ चैत्यंवर्तलाकारत्वानुद्धायतनमिवप्रासादस्तंभसहस्रेणाधाराभूतेनस्थितं ।६ ।७

पुष्परत्नशतैर्युक्तंपंचमंसागरंयथा सर्वर्तुपुष्पैर्निचितंपादपैर्मधुगंधिभिः ।३ नानानिनादैरुद्यानरम्यमृगगणद्विजैः अनेकगंधप्रवहंपुण्यगंधमनोहरं शैलेंद्रमिवगंधाढ्य द्वितीयंगंधमादनं अशोकवनिकायांतुतस्यावानरपुंगवः ।४ सददर्शाविदूरस्थंचैत्यप्रासादमूर्जितं मध्येस्तंभसहस्रेणस्थितंकैलासपांडुरं ।६ प्रवालकृतसोपानंतप्तकांचनवेदिकं मलेनमिवचक्षूंषिद्योतमानमिवश्रिया ।७ निर्मलंप्रांशुभावत्वादुल्लिखंतमिवांबरं ततोमलिनसंवीतांराक्षसीभिःसमावृतां ।८ उपवासकृशांदीनांनिःश्वसंतींपुनःपुनः ददर्शशुक्लपक्षादौचंद्ररेखामिवामलां मंदप्रख्यायमानेनरूपेणरुचिरप्रभां पिनद्धांधूमजालेनशिखामिवविभावसोः ।९

प्रांशुभावत्वात उच्चस्वभावत्वात ततस्तदर्शनानंतरं मलिनवासःसंवीतत्वादिविशेषणवतींसीतांतस्यादेवतन्मूलस्याददर्शेत्यनुकर्षः ।८ ।९ मंदप्रख्यायमानेनरूदमिदमितिरूदंनदितिवाकथंचिद्विहूत्यमा

नन्दीयोगसावलिपट्टिकं २

श्री रा बा सुं टी ९४ 127 क्लिष्टेन जीर्णेन पांसुधूसरेण वा क्लिष्टेन सपंकां मलवच्छरीरां पद्मिनी लक्ष्मीलताव २१ अंगारकेणेव वक्रतुल्येन ग्रहेणाकेतुनापी
डितां रोहिणीमिव २२।२३ प्रियजनं रामलक्ष्मणसुग्रीवादिरूपजनं स्वगणेन मृगगणेन २४ जघनं स्पृष्टमागतया श्राम्यैकया हर
णादिना हलनैकसंस्कारवन्यायद्वा पृष्ठभागे यद्वेणी ह्यरोहि त्येनस्पृष्टं लंबयैकया वेण्या नीलसमानलया वेण्या पलक्षितां अ

पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा संपंकामनलंकारां विपद्मामिव पद्मिनी २१ पी
डितां दुःखसंतप्तां परिम्लानां तपस्विनी ग्रहेणांगारकेणेव पीडितामिव रोहिणी २२
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च शोकध्यानपरां दीनां नित्यं दुःखपरायणां २३
प्रियं जनमपश्यंतीं पश्यंतीं राक्षसीगणं स्वगणेन मृगीं हीनां श्वगणेनावृतामिव २४
नीलनागाभया वेण्या जघनं गतयैकया नीलया नीरदापाये वनराज्या महीमिव २५
सुखार्हां दुःखसंतप्तां व्यसनानामकोविदां तां विलोक्य विशालाक्षीमधिकं मलिनां कृ
शां तर्कयामास सीतेति कारणैरुपपादिभिः ह्रियमाणां तदा तेन रक्षसा कामरूपिणा
२६

नेन तन्नयनैर्न्यस्यस्मरणामेवेति सूचितं मेघापाये नीलया वनराज्योपलक्षितां महीमिव स्थितां २५।२६ उपपादिभिः सीतात्वनिश्च
यायोपपादनसमर्थैः तत्कारणमेवाभिज्ञानमाह ह्रियमाणेति यथारूपा दृष्टा या यादृशवेषवर्णादिमती श्रुता तथारूपेयं भवे

हिप्रतिविभिन्नानन्दमयपदानुमितिमात्रः ॥ २

128 पूर्णचंद्राननत्वादिगुणवतीं निरीक्षतस्य बुद्धिः सिंदिक्षितेश्वर पंचविंशतश्लोकेनान्वयः सुभ्रूं सुभ्रुवं २८ सर्वा दिशो वितिमिराः ऊर्ध्वे नीनी
लकंठी सौभाग्यसूचकेंद्रनीलमणिमयकंठस्य भूषणप्रभयान्वितकंठा सुप्रतिष्ठिता सुप्रतिष्ठितसर्वावयवसंस्थाना २९
चंद्रप्रभासादृश्यं सर्वानंदकरत्वेन ३० नियतां भूशयनादिनियमवतीं तापसीमिव भूमावासीनां भुजंगेंद्रवधूसादृश्यं दुःखार्त

यथाद्रूपादिहृष्टास्तानथापेयमंगना पूर्णचंद्राननां सुभ्रूं चारुवृत्तपयोधरां २८ ऊर्ध्वे
तां प्रभया देवीं सर्वा वितिमिरा दिशः नीलकंठीं बिंबोष्ठीं सममध्यां सुप्रतिष्ठितां २९
सीतां पद्मपलाशाक्षीं मन्मथस्य रतिर्यथा दृष्टां सर्वस्य जगतः पूर्णां चंद्रप्रभामिव ३०
भूमौ सुतनुमासीनां नियतामिव तापसीं निश्वासबहुलां भीरुं भुजंगेंद्रवधूमिव ३१
शोकजालेन महता विततेन न राजसीं ससक्तां धूमजालेन शिखामिव विभावसोः ३२
तां स्मरंतीमिव संदिग्धां स्मृतिं निपतितामिव विहतामिव च श्रद्धामाशां प्रतिहतामिव ३३

धूमेनेव दुःखेन नाशकत्वेन च ३१ न राजंतीं अराजंतीं विभावसोः शिखामिव पातिव्रत्यतेजसा उज्वलंतीं ३२ स्मरंतीमिवेति दीर्घध्यानं सं
दिग्धां संदेहवतीं स्मृतिमिव स्वयं निपतितां सन्न्यायवशादिति भावः विहतां नास्तिकबुद्ध्येति भावः प्रतिहतां स्वविषयालाभादिति भा वः ३३

श्री वा रा सं टी ८५

129

सोपसर्गां सविघ्नां सकलुषां रागद्वेषां रागद्वेषादिकालुष्यवतीं अभूतेनापवादेन केवलमारोपितेनेति न कलंकेन ३४ रामोपरोधः रा
मस्य वा प्रतिबंधः ३५ कृष्णानि वक्राणि अक्षिपक्ष्माणि यस्य तेन ३६ संस्कारस्नानराहित्यात् मलयुक्तत्वं त्वगादिमलरूपः पंकः नक्षत्रा
जश्चंद्रः ३७ संदिदिहे प्रत्यभिज्ञान्वा बाधकानेकाश्रयमालिन्यादिति रोदनरूपत्वात्संदेहः आम्नाया अभ्यासः ३८ बाधकस्यापि किंचित्कत्वमाह

सोपसर्गां यथासिद्धिं बुद्धिं सकलुषामिव अभूतेनापवादेन कीर्तिं निपतितामिव ३४
रामोपरोधव्यथितां रक्षोगणनिषेवितां अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ३५
वाष्पाम्बुपरिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ३६
मलपंकधरां दीनां मण्डनार्हाममण्डितां प्रभां नक्षत्रराजस्य कालमेघैरिवावृतां ३७ तस्य
संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य च. आम्नायानामयोगेन विद्यां प्रशिथिलामिव ३८
दुःखेन बुबुधे सीतां हनूमाननलंकृतां. संस्कारेण यथा हीनां वाचमर्थान्तरं गतां ३९ तां
समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दितां तर्कयामास सीतेति कारणैरुपपादयन् ४०

दुःखेनेति दुःखेन बोधे हेतुरनलंकृतत्वमपीति संस्कारेणेति स्नानानुलेपनादिरंगसंस्कारः वाचो व्याकरणज्ञानादिजः संस्कारः दे
शार्थान्तरगतत्वं देशान्तरगतत्वं वा वस्तु विवक्षितार्थादन्यार्थबोधकत्वं वाचोऽर्थाय व्याकरणाद्यभ्यासः दुःखेन बुबुधे इति संपा
दकत्वमनेन हनूमान् सीतां कष्टेन बुबुधे ३९ कारणैरुपपादयन् सीतानिश्चयहेतुभिरुपपत्तिमन्तं संपादयन् ४० ४. ४.

130 इदानीं सीतान्वयप्रतिपादकमाह वैदेह्या इति तदा स्वप्रस्थानसमये गात्रशोभीनीति भावः कनकसंमतः ये ष्वंगेषु यान्याभरणजालान्य-
कीर्तयत् तान्याभरणजालानि तत्र गात्रशोभीनि लक्षयादिति प्रत्यभिज्ञाश्रमाणप्रसिद्धं तीर्थस्तु गात्रशोभीनीति पाठं प्रकल्प्यरा-
मविश्लेषसमये भूषणाधारणस्यानुचितत्वाद्वैदेह्या भूषणानि स्वांगेभ्य उन्मुच्य गात्रशोभीन्यपि तानीति गम्यत इति व्याचख्यौ तत्र उत्त-
र श्लोकयोर्हस्तेष्विति तथा श्यामानि चिरयुक्तत्वादिति यदुक्तं तस्य विरुद्धं किंचैवं तदंगे रामोक्ताभरणाभावादसीताचेमवस्यात् ५१

वैदेह्या यानि चांगेषु तदा रामोऽन्वकीर्तयत् तान्याभरणजालानि गात्रशोभीन्यलक्षयत् ५१
सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ५२
श्यामानि चिरयुक्तत्वात्तथा संस्थानवंति च तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ५३

अथ यकस्मिन् गात्रे किमाभरणं ह्यपनेतत्राह सुकृतौ सुनिर्मितौ कर्णवेष्टौ कुंडले श्वदंष्ट्रौ कर्णाभरणविशेषौ त्रिकर्णिकापरनामा-
नौ सुसंस्थितौ कर्णेद्रुपांगेषु प्रतिष्ठितौ उपलक्षयेइति शेषः हस्तेषु हस्तावयवेषु च यानि मणिविद्रुमचित्राण्याभरणानि रामे-
णोक्तानि तथैव संस्थितानि लक्षये ५२ चिरयुक्तत्वात् चिरकालमसंस्कृतदेहस्थितत्वेनासंस्कृतत्वात् श्यामान्यपि श्यामवर्णा-
न्यपि तथा संस्थानवंति रामोक्तसन्निवेशवंति यानि रामोऽन्वकीर्तयत् तान्येवेमानीति मन्ये ५३

श्री 13/ इत्येवमित्याह तत्रेति रामोपदिष्टेष्वाभरणानि अवहीनानि पतितानि तानि ऋष्यमूकादौ इत्यर्थः ४४ कानि तान्यसक्तानीति तत्राह गात्रानुग
वा रा तत्राह पीतमिति कनकपट्टाभवत्वेन स्वर्णतंतुमात्रनिष्पन्नत्वं तस्य सूच्यते नगासक्तं वृक्षासक्तं ४५ ऋष्यमूके वस्त्रभूषणान्यागा
सुं टी प्यनयैव क्षुनरस्याह अनेनैवेति ४६ इदं वसनं उत्तरीयवस्त्रमित्यर्थः चिरधृतत्वात्क्लिष्टवत्तरं शयनादिना म्लादितं तथापि तद्व
९९

तत्र यान्यवहीनानि तान्यहं नोपलक्षये यान्यस्या नावहीनानि तानीमानि न संशयः ४४
पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभं उत्तरीयं नगासक्तं तदा दृष्टं प्लवंगमैः ४५ भूषणा
नि च मुख्यानि दृष्टानि धरणीतले अनयैवापविद्धानि स्वनवंति महांति च ४६ इदं चिर
गृहीतत्वाद्वसनं क्लिष्टवत्तरं तथाप्यनूनं तद्वर्णं तथा श्रीमद्यथेतरत् ४७ इयं कनक
वर्णांगी रामस्य महिषी प्रिया प्रणष्टापि सती यस्य मनसो न प्रणश्यति ४८

सतीतेरामः अनूनं अप्रच्युतः क्लीवत्वमार्षम् धर्मांचादिर्वा वर्णशब्दः तथा श्रीमत् शोभावत् यथेतरत् अस्मत्क्ष
हीनसततरीयमित्यर्थः ४७ पूर्वज्ञाननिश्चयमाह इयमिति प्रनष्टादर्शनं प्राप्तापि यस्य रामस्य मनसः सकाशात्प्र
णश्यति नादृष्टा भवति नित्यं सन्निहिता भवतीत्यर्थः ४८

132 साश्चयमेव केवलाबलत्वाद कारुण्येनेति परितापहेतुकारुण्यादि स्वयमेव दर्शयति स्त्रीति अनाष्टापरेणापीडितामयाश्वसतीमानरुद्धिः
ता ग्राम्यादिस्त्रियोरक्षा इत्युक्तेस्तदकरणकृतकारुण्यात्परितापः वनं प्रस्थितमयि मामाश्रिता साचनरक्षतेति आनृशंस्यतः आश्रितसं
रक्षणस्वभावत्वेन तदकरणात्परितापाः पत्नीसर्वधर्मसाधनभूतानष्टेति धर्मणाशचिन्ताशोकेन परितापः प्रियेति परमरूपलावण्या
दिमती परमसुखसाधनमस्ता नष्टेति एवं संभोगादिस्मरणजमदनेन सर्वसिद्धसर्वेन्द्रियपरितापाः ४९ ५ अस्या यथारूपादि तथा राम

इयं सा यत्कृते रामश्चतुर्भिः परितप्यते कारुण्येनानृशंस्येन शोकेन मदनेन च ४९ स्त्री प्रण
ष्टेति कारुण्यमाश्रितेत्यानृशंस्यता पत्नी नष्टेति शोकेन प्रियेति मदनेन च ५० तस्या देव्या यथा
रूपमंगप्रत्यंगसौष्ठवं रामस्य च यथारूपं तस्येयमसितेक्षणा ५१ अस्या देव्या मनस्तस्मिंस्तस्य
चास्यां प्रतिष्ठितं तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ५२

स्य यथा रामस्य रूपादि तथाऽस्यापि अतः सोऽस्या योग्यः इयं च तस्य यो
ग्येत्यर्थः अनेनोभयोरन्योन्यानुरूप्यं दर्शितं ५१ अथान्योन्यानुरागमाह अस्या देव्या इति येनास्यामाश्रितं रामे सक्तं तस्य चास्यां तेनेयं
स च जीवति विप्रसन्निधानेन वियोगाभावादिति भावः मुहूर्तमपि रत्यस्यान्यथेत्यादिः नजीवेदिति च शेषः ५२

श्री 133 दुष्करमिति प्रवृत्तेनेनेति वर्त्तते न विन्नु सन्निधानेन दुष्करं किं कृतवानत आह धारयतीति वर्त्तमानसमीप्ये लट् देहधारणेनैव धैर्यं सीतामेवं वमेवं
रा वा गुणगणानयामास्लनवासः सर्वोन्नत्वापवास हृत्शल्यशोकु ध्यानपरायणात्वादिं पातिव्रत्य धर्मवती हृष्टो हृष्टः सन्रामं समस्मार स्मृतं
सु टी॰ च तं प्रशशंस एव पातिव्रत्यगुणाहृत्यत्नीलाभेन भाग्यातरोरामः ईदृश्या वियोगेनेह शरीरधारणं ईदृशो प्राप्यये उद्यमस्त्वौचितएवेति
९॰

दुष्करं कृतवान्रामो हीनो यदनया प्रभुः धारयन्त्यात्मनो देहं न शोकेनावसीदति ५२ एवं सी
तां तदा दृष्ट्वा हृष्टः पवनसंभवः जगाम मनसा रामं प्रशशंस च तं प्रभुं ५३ इत्यार्षे रामायणे
सुन्दरकाण्डे पञ्चदशः सर्गः १५ प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुंगवः गुणाभिरामं रामं च पु
नश्चिन्तापरोऽभवत् १ स मुहूर्त्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः सीतामाश्रित्य तेजस्वी
हनूमान्विललाप ह २

चास्मीतां च प्रशशंस वलवता भवेन शश्रु गुणाहृता पि याप एवं पातिव्रत्या न देशे वसर्वां जनमेन ते
वेशाशशासु ५३ वमनानः इत्यार्षे रामायणे सुन्दरकाण्डे पञ्चदशः सर्गः १५ सीताप्रशस्य प्रशंसा च शशुकृ दृष्ट्या चिंतापरः सीतावि
षयकः खेदेनेति भावः १ सीतामाश्रित्य सीतामुद्दिश्य २

९॰

134 गुरुभिर्विनीतस्यापि शिक्षितस्य लक्ष्मणस्य गुरुप्रिया गुरोः रामस्य पत्नीत्वात् तद्देवपरमोपास्यत्वेनाभीष्टा सीता अग्रयोनिजातिः सीम·
यानिक्रम्य रामपत्न्यापि यदि दुःखार्ता तदा दुःखपीडिता तर्हि कालो दुरतिक्रम्य इति द्विनोत्सृतमित्यर्थः दुःखोपायचरकत्वस्य कातुपवप्रसि·
इत्यादितिभावः ननु दुःखं वा कालमात्रजन्यं कर्मानुष्ठानवैफल्यापत्तेः तस्यायत्तकाजन्यत्वेपि ईश्वरावतारसीतारामयोः कर्मा·
भावात्कथं दुःखमिति चेत् वस्तुतस्तु नत्वयोः दुःखाभावेपि लोकानुग्रहाय गृहीतमनुष्यदेहयोस्तेशां मनुष्यत्वाभावबुद्धिप्रतिबन्धायन
टवत्तद्व्यवहारमभिनयतोः सावदुःखादिकालिकमत्वविकासाद्यभिनयेन तन्मायामादितस्यैव देवांशस्य हनूमतोभिनीतका
र्यदर्शनतत्कारणानुमानात् दुःखातिस्वायुक्तेः सामंजस्यात् यथाच परेणाहेयधनेविनाहनूमतः स्वबलापराक्रमाशेमोहस्तथान

मान्याग्रहविनीतस्य लक्ष्मणस्य गुरुप्रिया यदि सीता हि दुःखार्ता कालो हि दुरतिक्रमः
रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः नात्यर्थं क्षुभिते देवी गंगेव जलदागमे ५

मोर्भगवत्स्वरूपत्वेनेदानींतस्य मोहइतिवक्तुंशक्यत्वात् पश्चाद्भगवदिच्छयैव तस्य नयोः स्वस्वरूपज्ञानेपि न किंचिदवद्यम् २ नन्वेवं·
विधदुःखातिशये जीवनहानिरेव स्यादत आह रामस्येति स लक्ष्मणो रामपवेविधेदुर्गेष्वपि तामपि मा दिव्यास्वेः समुद्रमपि·
येनकेनाप्युपायेनोल्लंघ्यागत्याशास्यतीतितस्य व्यवसायज्ञा पराक्रमज्ञा सती नात्यंतं क्षुभ्यते नेतस्य मूलकशणान्यागसंपादक
त्वोमंन्यामीतीत्यर्थः जलदागमे वर्षाकाले पि गंगा यथा इतरक्षुद्रनदीवदुर्धरवेगेन शोभातितद्वत् ५

135 तुल्यशीलवयोवृत्तां रामतुल्यस्वभाववयश्चारित्रां अभिजनः कुलं लक्षणं सामुद्रिकोक्तं अत एव सीताया रामस्य पुरुषांतरे स्त्र्यंतरे वा
प्रवृत्तिः स्वभावमूलेति सूचितं ५ मनसा रामं जगाम अस्याः स एवानुरूप इति संस्मारेत्यर्थः नवहेमाभां नवीनस्वर्णीहमाभा चेत्य
र्थः ६ अस्या हेतोः सर्वात्मना स्वसहश्यप्राप्त्यर्थमित्यर्थः ७ दूषणेन तरवैनिपातश्चैनदा सकृत्या शूर्पणखानिरासमूलत्वादन्वेषणा

तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणां राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ५ तां
दृष्ट्वा नवहेमाभां लोककांतामिव श्रियं जगाम मनसा रामं वचनं चेदमब्रवीत् ६ अस्या
हेतोर्विशालाक्ष्या हतो वाली महाबलः रावणप्रतिमो वीर्ये कबंधश्च निपातितः ७ विरा
धश्च हतः संख्ये राक्षसो भीमविक्रमः वने रामेण विक्रम्य महेंद्रेणेव शंबरः चतुर्दश सहस्रा
णि रक्षसां भीमकर्मणां निहतानि जनस्थाने शरैरग्निशिखोपमैः ९ खरश्च निहतः संख्ये
त्रिशिराश्च निपातितः दूषणश्च महातेजा रामेण विदितात्मना ऐश्वर्यं वानराणां च दुर्ल
भं वालिपालितं अस्या निमित्ते सुग्रीवः प्राप्तवान्

प्रतिबंधसंभावनामूलकत्वाच्चैतन्मूलमेव शंकरोयं प्रयु
क्तहननादयएव महेंद्रपदेन तुल्यप्रयुक्तलक्षणा वा ८९ १० अस्या निमित्ते सत्यम्यर्थे षष्ठी अस्यां निमित्तभूतायां सत्यामित्यर्थः

श्री रा वा सुं टी ९८

९८

136 १२ परिवर्तयेत् अथ धरोत्तरं कुर्यात् संहरेदिति यावत् ।२ एवं मेतेषु कृत्स्नमुपपादयति राज्यं वेति त्रैलोक्यराज्यसीतालाभयोः कतरत् उत्कृ-
ष्टमिति विचारे अत्र द्वितीयकोटिनिर्णीतोऽशेन साहृश्यमपि नास्तीत्यर्थः ।५ आधिक्यमेवोपपादयति इयमिति अनेन कुलमर्न्यहृष्ट
अनेत्यनेन चारित्र्यातिशयः मेदिनीं भित्वेत्यनेनायोनिजतया मानुषादिव्यरूपत्वं दर्शितं ।५।६ आर्यशीलस्य ह्यार्यशीलस्य

मारारयुग्मयाक्रांतः श्रीमानुदन्नदीयतिः अस्याहेतोर्विशालाक्ष्याः श्रीवेयं निरीक्षिता यस्या
मेः सगराज्ञा तां मेदिनीं परिवर्तयेत् अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ।३ राज्यं वापि च
लोके सीतावाजनकात्मजा त्रैलोक्यराज्यं सकलं सीतायानाप्नुयात्कला इयं सा धर्मशीलस्य
जनकस्य महात्मनः सुता मैथिलराजस्य सीता भर्तृदृढव्रता उत्थिता मेदिनीं भित्वा क्षे
त्रे हलमुखक्षते पद्मरेणुनिभैः कीर्णा शुभैः केदारपांशुभिः ।४ विक्रान्तस्यार्यशीलस्य संयु
गेष्वनिवर्तिनः स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी धर्मज्ञस्य कृतज्ञस्य रामस्य विदि
तात्मनः इयं सा दयिता भार्या राक्षसीवशमागता ।६

अनेन महाकुलीनपरिग्रहणं दर्शितं ।७ यच्छेषतयैवं श्लाघ्यं दर्शितं तस्य कालस्य दुरतिक्रमत्वमाह इयं सेति राक्षसीवशमागता
कालश्च बलवान् इत्यादि दिभावः फलमत उपपत्तेरिति व्याससूत्रेणापि कालात्मनो भगवत एव कर्मफलदाणं सामर्थ्यं दर्शितं ।८

श्री
वा० रा०
सु० टी०
६९

137 भर्तृस्नेहबलात्कृता बलात्प्रवर्तिता १९ भर्तृशुश्रूषणापरा समं चेतनात्सार्थं तिविणापासत्रोऽयोतिष्ठच २० एवंवदेवाद सेयमिति या
तनं नारागद्भसीभिः संपाद्यमानतीव्रदुःखं श्रुतं घोनामापदा २१ शीलं संपन्नां दृष्टुं शीलं खेपरित्रप्रच्यवरहितं प्रमथितां प्रमथिता
मपि प्रपामिव पिपासितो यशोत्ता २२ २३ काम्यत इति कामः भुज्यन्त इति भोगाः स्रक्चन्दनादयस्तैः परित्यक्ता तत्समागमकाङ्क्षिणी पतिसौ

सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता अचिंतयित्वा कष्टानि प्रविष्टा निर्जनं वनं १९ संतुष्टा फ
लमूलेन भर्तृशुश्रूषणापरा या परां भजते प्रीतिं वनेपि भवने यथा २० सेयं कनकवर्णांगी
नित्यं सुस्मितभाषिणी सहते यातनामेतामनर्थानामभागिनी २१ इमां तु शील[illegible]संपन्नां द्रष्टु
मिच्छति राघवः रावणेन प्रमथितां प्रपामिव पिपासितः अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमे
ष्यति राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीं २३ कामभोगैः परित्यक्ता हीना बंधुजनेन च
धारयत्यात्मनो देहं तत्समागमकांक्षिणी नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान् एकस्थ
हृदया नूनं राममेवानुपश्यति २५ भर्ता नाम परं भार्या शोभने भूषणादपि एषा हि रहिता तेन
शोभनार्हा न शोभते २६

ख्यं तस्मान्नं देहं न रक्षं वर्षशतादपीति न्यायेनेति भावः २४ राक्षस्यः राक्षसीरित्यर्थः एकस्मिन्नर्थे स्थितेति
तादृशं हृदयं यस्याः सा किं तदेकं लक्ष्यं तत्राह नूनं राममेवेति २५ राममेवेत्यत्र बीजमाह भर्ता नामेति शोभनं शोभा २६

६९

138 पनदेकएदयत्वज्ञानादेवरामः प्रभयंजीवनल्पंड्डःखेनावसाधनाभावतूपंचडक्षरं कुरुते २७ ममापितिर्यग्भ्योनेरयिविषयानभिज्ञस्य
स्यापि २८ क्षितितल्यालमायस्याः सा दृष्टिमात्रेणरावणस्याभस्मीकरणात् संरक्षणेपरैरनपहारायगोप्यतइत्यर्थः २९ रूपणाशो

दुष्करं कुरुतेरामोहीनोयदनयाप्रभुः धारयत्यात्मनोदेहंनदुःखेनावसीदति २७ इमांमम्मि
नकेस्मांतांशातपत्रनिभेक्षणां सुखाहांदुःखितांत्वामममापिव्यथितेमिव २८ क्षितिक्ष्मा
मापरूक्षनिभेक्षणायावह्निनाराघवलक्ष्मणाभ्यां साधात्रसीमिर्विक्रहनेत्रणाभिः
मेत्युनेसप्रीतिकृतमूले २९ हिमहतनलिनीवनष्टशोभाव्यसनपरंपरयातिपीड्यमा
ना सहचररहितेवचक्रवाकीजनकसुतांकृपणांदशांप्रपन्ना ३० अस्याहिपुष्पावनता
ग्रशाखाः शोकंदृढंवैजनयंत्यशोकाः हिमव्यपायेनचशीतरश्मिरभ्युत्थितोनेकस
हस्ररश्मिः ३१

व्यां ३१ नकेवलमशोका एवशोकजनकस्तंद्रीपीत्याह हिमव्यपासेनेवसंतसमीयश कालेनोपलक्षितः यद्वालंकायां
हिमव्यपायेनशीताभावेनाभ्यफत्यितोतिप्रकाशतयास्थितः अनपवोनेकसहस्ररश्मिरश्मिः अभ्यफधितः उदयेशाम्नः शी

नैषधमहाकाव्यटीका सर्ग ५

श्री रा वा
हं टी
७.

139 सीतेयमितिवेव इयं सीतैवेतिज्ञानबुद्धिस्तामेवबुद्धिं संश्रित्यततः परानष्टेपविकीर्षयां तस्मिन्शिंशपायावृक्षेपवनिषसाद तद्वात्रिशे
षपरदिनंवसितइत्यर्थः एवं च सरावणात्‌पुरासर्वापिलंकागामत्रपेणसमुद्रलंघनदिनरात्रावेवविचिता तृतीयायामेषशोकतिका
प्रवेशइतिवोध्यं ३१ रामसातेः इत्यार्षेसुंदरकांडेपंचदशः सर्गः १५ ततः तद्दिनापगमानंतरंकुमुदषंडं कुमुदसमूहस्तदाभंश्वेत्येनतिर्मलेन

इत्येवमर्थंकपिरन्ववेक्ष्यसीतेयमित्येवनुजातबुद्धिः संश्रित्यतस्मिन्निषसादवृक्षेवलीहरीणामृषभस्तरस्वी ३१ इत्यार्षेसुंदरकांडेपंचदशः सर्गः १५ ततः कुमुदषंडाभोनिर्मलोनिर्मलोदयः प्रजगामनभश्चंद्रोहंसोनीलमिवोदकं १ साचिव्यमिवकुर्वन्सप्रभयानिर्मलप्रभः चंद्रमारश्मिभिः शीतैः सिषेवपवनात्मजं २

नीलजलमिवोदकं हंसोनीलमुदकमिवेति नभसोनीलत्वंप्रतीत्याकुमिविसंप्रदायेन च बोध्यं नभोजगाम किंचिन्नभउपरिभागंजगामेत्यर्थः सा
मेत्यर्थः १ साचिव्यमिवसीतादर्शनाद्योप्रभयास्वकांत्यासाचिव्यमिवसाहाय्यकमिव दिवाकरविदेकांतप्रदेशेस्थितत्वात्तिरोहितत्वा
दाकुलत्वाद्वनसमुदायाद्वासीनोसीतायाश्चदर्शनेनराश्रो चंद्रोदयेसतितत्पुनः समीपदेशआगत्यस्थितस्यसम्यक्प्रदेश

८
८५.

140 शोणकभौरैन्यस्ता अयोनीतामिवनिमज्जमानामिव ३ दिदृक्षमाणाः प्रकटतयातां द्रष्टुमिच्छुः ४ कर्णाभावरणामितिविशालक·
र्णीमस्तकोच्छ्वासनासिकांऊर्ध्वमुखनासां ५ अतिकायोतमांगीअतिप्रवृद्धोपरिभागदेहवंती नेत्रदीर्घशिरोग्रस्थलदीर्घग्री·
वामित्यर्थः शरीरकेशैः केवलयारीणीमिव ६ विवृकेसंवद्धदेष्ट्राष्टोयस्यास्ता · विकटावक्रशरीराकरालाभयंकरहलव

सदष्टदंशितनः सीनीपूर्णांवृद्धनिमाननां शोणकभौरैरिवन्यस्तां भौरैतामिवांभसि ३ दिदृ
क्षमाणावैदेहीहंसमाम्भक्तनात्मजः सदष्टदंशविहरस्याराह्लसीचैरदर्शनाः प्रकाद्देमेक
कर्णांवक्रणांश्रावणांतथा अकर्णांशङ्कुकर्णांचमस्तकोच्छ्वासनासिका ५ अतिकायो
त्तमांगीचतनुदीर्घशिरोधरां ध्वस्तकेशीतथाकेशकेषकेवलधारिणी ६ लंबकपोल
ललाटांचलंबोदरपयोधरां लंबोष्ठीचिवुकोष्ठीचलंबास्यालंबजानुकी ७ ह्रस्वादीर्घांचवक्र
